॥ श्रीवर्द्धमान-सत्य-नीति-हर्षसूरि-जैनग्रन्थमाला नं. १९. ॥

भेट ] अर्हम् ॥ [ भेट

चान्द्रकुल-तपागच्छ-संविग्नशाखाग्रणी जिनागमरहस्यवेदी सुविहित आचार्य श्री विजयहर्षसूरीश्वर सद्गुरुभ्यो नमः ॥

॥ श्री श्रुतधरपूर्वाचार्य प्रणीत-

# ॥ धर्मोपदेश संग्रह ॥

—: प्रकाशक :—

लवारनीपोळ जैन उपाश्रयना सेक्रेटरी शाह वाडीलाल मह्रोकमभाई वकील-अहमदाबाद.

वीर सं. २४८६ वि. सं. २०१६ ] प्रति ५०० [ सत्य सं. २६० ईस्वी सं. १९६०

# आभार प्रदर्शन

आ पुस्तक प्रकाशित करवामां लुवारनीपोळ जैन उपाश्रयना ज्ञान द्रव्यमांथी उपाश्रयना ट्रस्टीओए आर्थिक सहाय आपी छे ते बदल तेमनो आभार मानवामां आवे छे.

ली० प्रकाशक

मुद्रक : पंडित मफतलाल झवेरचंद गांधी, नयन प्रिन्टींग प्रेस, ढींकवानी वाडी रीचीरोड पुल नीचे, अमदावाद.

# बे बोल

प्रामाणिक पुरुषनुं कथन तेने उपदेश कहेवामां आवे छे आ प्रामाणिक पुरुषो दुनियादारी ना होय तेनुं उपदेश कथन नीतिमां समाय छे जे प्रामाणिक पुरुषो लोकोत्तर छे तेनुं उपदेश कथन धर्म-आगम कहेवाय छे. आ आगमवचन एज धर्मवचन अने धर्मोपदेश छे. आ धर्मोपदेश ठेर ठेर शास्त्रमां गुंथायेल छे.

आ ग्रन्थ कोई स्वतंत्र ग्रन्थ नथी परंतु जुदा जुदा ग्रन्थोमांथी धर्मोपदेशने लगतो जीवन उपयोगी संग्रह करवामां आव्यो छे. शास्त्रोमां ठेर ठेर जे नवनीत वेरायेल छे ते नवनीत अहिं एकठुं करवामां आव्युं छे.

जीवनमां प्रयाण करनार साधकने एक ज सूक्त जीवननो मार्गदर्शक बने छे. आवा अनेक उपयोगी सुक्तो अहिं आपवामां आव्यां छे.

आ ग्रन्थ व्याख्यान उपयोगी अने जीवन उपयोगी पण छे. वांचक तेनो लाभ उठावे ते भावना.

प्रकाशक —

| अशुद्धं | शुद्धं | पृष्ठ | पंक्ति |
|---|---|---|---|
| कामभागेभ्यः | कामभोगेभ्यः | ६ | १ |
| बहुसावि | बहुसोवि | ६ | ११ |
| द्विट्पक्ष | द्विट्पक्षे | ७ | ११ |
| उत्फुल्ललोवनः | उत्फुल्ललोचनः | ९ | ३ |
| माचिता | मोचिता | ९ | ४ |
| तदुस्तस्यै | ददुस्तस्यै | ९ | १० |
| भूमृताद्यप | भूमृताद्यप | ९ | ११ |
| वर्गिका | वर्णिका | १० | ११ |
| संभ्रम | संग्राम | १२ | ११ |
| अपेक्ष्य | उपेक्ष्य | १७ | ८ |
| दूष्कर्मकमुपकार | दूष्कर्मनुपकार | २१ | १३ |
| मादवं | मार्दवं | २२ | ५ |
| जाणि | जोणि | २३ | २ |
| जनकाऽन्येद्यु | जनकोऽन्येद्यु | २३ | ११ |
| व्यकरे | व्यतिकरे | २८ | २ |
| सुहृदा | सुहृदा | २५ | १२ |
| धरका | धराका | २६ | ४ |
| कुटिलालाचनां | कुटिलालोचनां | २७ | २ |
| माक्षः | मोक्षः | २७ | ३ |
| सहसात्पन्न | सहसोत्पन्न | २८ | १३ |
| राजान | राजानं | २८ | १३ |
| लोभस्यकस्य | लोभकस्यैकस्य | ३० | १० |
| सैतोषाऽऽस्वादजं | संतोषाऽऽस्वादजं | ३१ | ५ |
| न मुक्ते | न भुक्ते | ३२ | ३ |
| प्रातःकाला | प्रातःकालो | ३२ | १५ |
| श्चक | श्चके | ३२ | ३ |

| अशुद्धं | शुद्धं | पृष्ठ | पंक्ति |
|---|---|---|---|
| तमन्याऽयं | तमन्योऽन्य | ३४ | ३ |
| स्पर्शनमिदिात्तयम् | स्पर्शनमिन्द्रियम् | ३६ | ९ |
| विमुच्योच्च | विमुच्योच्चै | ३६ | १० |
| जातुवित् | जातुचित् | ३७ | १ |
| दशद | दशधा | ३७ | १२ |
| समायाताः | समायतः | ४० | ८ |
| मनसे | मानसे | ४० | ९ |
| युवया | युवयो | ४१ | १ |
| नाप्नाति | प्राप्नोति | ४२ | २ |
| लभ्यते | लभ्यते | ४२ | १३ |
| ततयो | तत्पायो | ६३ | ६ |
| चेतानिरोदनं | चेतोनिरोधनं | ४३ | ७ |
| नयराजमनं | नयराजमानं | ४६ | १ |

| अशुद्धं | शुद्धं | पृष्ठ | पंक्ति |
|---|---|---|---|
| याऽनेन | योऽनेन | ४८ | ८ |
| धमवासना | धर्मवासना | ४९ | २ |
| भुक्त्योत्थिया | भुक्त्वोत्थितो | ५१ | २ |
| दुःज्ञीलोमिभि | दुःशीलैर्लोभि-मिश्रौरैः | ५२ | ७ |
| दस्थ्ये | दौस्थ्ये | ५२ | ७ |
| स्वगुणवणक | स्वगुणवर्णक | ५२ | ७ |
| सहस्रषु | सहस्रेषु | ५४ | ३ |
| सुगः | सुरः | ५४ | ५ |
| मलाबुहन्भ्रद् | मलाबुरन्ध्राद् | ५७ | ११ |
| पानीयाद्दूरत | पानीयादूरत | ५९ | १२ |
| दिनाजतं | दिनार्जितं | ६० | १० |
| तत्रानान्यूय | तत्रानाय्य | ६२ | ९ |

| अशुद्धं | शुद्धं | पृष्ठ | पंक्ति |
|---|---|---|---|
| चाम्भोभिभि | चाम्भोभि | ६२ | ८ |
| सत्यकारं | सत्यंकारं | ६० | ११ |
| मैथुनान् | मैथुनात् | ६९ | ६ |
| बालु | वालु | ७९ | १४ |
| स्त्राभक्ष्य | स्त्रीभक्ष्य | ७० | ४ |
| जनितोत्रत | जनितोत्तम | ७१ | ११ |
| असंबद्ध २५मो श्लोक भुलथी छपायो छे | | ७३ | ७ |
| कममो | कर्मतो | ७४ | ४ |
| स्ताकं | स्तोकं | ७४ | ६ |
| वसत्यशन | वसत्यशन | ७५ | ६ |
| मंगीकृत्यशु | मंगीकृत्याशु | ७६ | ११ |
| तत्रता | तत्रतो | ७७ | १३ |
| कल्याणाथ | कल्याणाय | ७९ | ३ |
| आह्वानाथ | आह्वानाय | ७९ | १२ |
| श्रीहीरीसूरेः | श्रीहीरसूरेः | ७९ | १३ |
| जगद् गुरू | जगद्गुरु | ९२ | ४ |
| सर्म्मयित्री | लम्भयित्री | ९३ | १० |
| पाटमहात्सवं | पाटमहोत्सव | ९४ | १० |

अर्हम्

वर्धमान-सत्य-नीति-हर्षसूरि जैन ग्रन्थमाला ग्रन्थाङ्कः नं. १९

चान्द्रकुल तपागच्छसंविग्नशाखाग्रणी तीर्थोद्धारक आचार्य श्री विजयनीतिसूरीश्वरसद्गुरुभ्यो नमः

श्रुतधर पूर्वाचार्य प्रणीत—

# धर्मोपदेशसंग्रहः—

चिदानंदस्वरूपाय, रूपातीतायतायिने ॥ परमज्योतिषे तस्मै नमः श्री परमात्मने ॥१॥
पश्यन्ति योगिनो यस्य, स्वरूपं ध्यानचक्षुषा ॥ दधानाः मनसः शुद्धिं तं स्तुवे परमेश्वरम् ॥२॥
जन्तवः सुखमिच्छन्ति निस्तुषं तच्छिवे भवेत् ॥ तद्ध्यानात् तन्मनःशुद्ध्या कषायविजयेन सा ॥३॥
स इन्द्रियजयेन स्यात् सदाचारादसौ भवेत ॥ स जायते सूपदेशान्नृणां गुणनिबन्धनम् ॥४॥

अस्मिन्नसारसंसारे सर्वेऽपि जन्तवः प्राणिनः निस्तुषं सुखमिच्छन्ति तत्सुखं शिवे मोक्षे भवेत्, स मोक्षः शुभध्यानात्प्राप्यते, ध्यानं च मनःशुद्ध्या भवति, सा मनःशुद्धिः कषायविजयेन भवति, सः कषायविजयः इन्द्रिजयेन स्यात्, स इन्द्रियजयः सदाचारात् भवति असौ सदाचारः गुणनिबन्धनं नृणां सदुपदेशात् जायते ॥

## १. संसारे दुःखं मोक्षे च सुखं

तत्र तावत् संसारस्वरूपमाह—

आधिव्याधिजरामृत्युज्वालाशतसमाकुलः । प्रदीप्ताङ्गारकल्पोऽयं, संसारः सर्वदेहिनाम् ॥ १ ॥
न युज्यते तद् विदुषः, प्रमादोऽत्र मनागपि । कः प्रमाद्यति बालोऽपि, निशोल्लङ्घ्ये मरुस्थले ? ॥ २ ॥
संसाराब्धाविहाऽनेकयोन्यावर्त्ताकुले जनैः । दुर्लभं मानुषं जन्म, महारत्नमिवोत्तमम् ॥ ३ ॥
परलोकसाधनेन, मानुष्यमपि देहिनाम् । पादपो दोहदेनेव, सफलीभवति ध्रुवम् ॥ ४ ॥
आपातमात्रमधुराः, परिणामेऽतिदारुणाः । शठवाच इवाऽत्यन्तं, विषया विश्ववञ्चकाः ॥ ५ ॥
पदार्थानामशेषाणां, संसारोदरवर्तिनाम् । *संयोगा विप्रयोगान्ताः, पतनान्ता इवोच्छ्रयाः ॥ ६ ॥
आयुर्धनं यौवनं च, स्पर्द्धयेव परस्परम् । सत्वरं गत्वराण्येव, संसारेऽस्मिन् शरीरिणाम् ॥ ७ ॥
संसारस्याऽस्य[1] गतिषु, चतसृष्वपि जातुचित् । नाऽस्त्येव सुखलेशोऽपि, स्वादु नीरं मराविव ॥ ८ ॥

---

* संयोगः स्युर्वियोगान्ताः सं १ ॥ + अय श्लोकः पा. पुस्तके न दृश्यते ॥ १ जन्तोः ।

तथाहि क्षेत्रदोषेण, परमाधार्मिकैरपि । मिथश्चाऽऽक्लिश्यमानानां, नारकाणां कुतः सुखम् ? ॥ ९ ॥
शीतवातातपाम्भोभिर्वधबन्धक्षुदादिभिः । विविधं बाध्यमानानां, तिरश्चामपि किं सुखम् ? ॥ १० ॥
गर्भवासजनिव्याधि-जरादारिद्र्यमृत्युजैः । क्रोडीकृ[1]तानामसुखैर्मनुष्याणां कुतः सुखम् ? ॥ ११ ॥
अन्योऽन्यमत्सरामर्षकलहच्यवनाऽसुखैः । सुखलेशोऽपि नैवाऽस्ति, कदाचित् द्युसदामपि ॥ १२ ॥
अज्ञानाज्जन्मिनो भूयो, भूयः संसारसम्मुखम् । अथापि परिसर्पन्ति, नीचाभिमुखमम्बुवत् ॥ १३ ॥
तद् भव्याश्चेतनावन्तो, निजेनाऽनेन जन्मना । मा पोषयत संसारं, दुग्धेनेव भुजङ्गमम् ॥ १४ ॥
संसारवासजं दुःखं, विचार्य तदनेकधा । सर्वात्मनाऽपि मोक्षाय, यतध्वं हे विवेकिनः ! ॥ १५ ॥
गर्भवासभवं दुःखं, नरकाऽसुखसन्निभम् । संसारवन्न मोक्षेऽस्ति, जीवानां हन्त ! जातुचित् ॥ १६ ॥
घटीमध्याकृष्यमाणनारकार्तिसहोदरा । नेह प्रसवजन्माऽपि, जायते जातु वेदना ॥ १७ ॥
बहिरन्तःपरिक्षिप्तशल्यतुल्या भवन्ति च । नाऽऽधयो व्याधयो नाऽपि, तत्र बाधानिबन्धनम् ॥ १८ ॥
अग्रदूती कृतान्तस्य, तेजःसर्वस्वतस्करी । पराधीनत्वजननी, न जरा तत्र सर्वथा ॥ १९ ॥
सञ्जायते नारकिकतिर्यग्नृद्युसदामिव । न तत्र मरणं भूयो, भवभ्रमणकारणम् ॥ २० ॥
किन्तु तत्र महानन्दं, सुखमद्वैतमव्ययम् । रूपं च शाश्वतं ज्योतिः, केवलालोकभास्करम् ॥ २१ ॥

१ अङ्कस्थापितानाम् ।

# २. ध्यानस्वरूपं

स च मोक्षः ध्यानात् सम्प्राप्यते अतो ध्यान स्वरूपमाह—

दुरन्तदुःखपरम्परानिमित्तमार्त्तरौद्रध्यानद्वयं परित्यज्य समग्रश्रेयःपरम्पराहेतुभूते धर्मध्यानशुक्लध्यानरूपे शुभध्याने मनो विधेयं. यतः—+अट्टेणं तिरियगई, रुद्दज्झाणेण गम्मए निरयं। धम्मेण देवलोए, सिद्धिगई सुक्कझाणेणं ॥१॥ तल्लक्षणं यथा—सद्दाइविसयगिद्धो, सद्धम्मपरंमुहो पमायपरो। जिणमयमणविक्खंतो, वट्टइ अट्टंमि झाणंमि ॥२॥ परवसणं अभिनिंदिय, निरविक्खो निरदओ निरणुतावो। हरिसिज्जइ कयपावो, रुद्दज्झाणोवगयचित्तो ॥ ३ ॥ जिणसाहूगुणकित्तणपसंसणा दाणविणयसंपुण्णो। सुअसीलसंयमरओ, धम्मज्झाणी मुणेयव्वो ॥ ४ ॥ अह खंतिमद्दवज्जवमुत्तीओ जिणमयपहाणाओ। आलंबणेहिं जेहिं, सुक्कज्झाणं समारुहइ ॥ ५ ॥ चतुर्धा तु शुभ ध्यानं, पिण्डस्थादिविभेदतः। निश्छद्मसाम्यसंभूतं, भव-

---

+ आर्त्तेन तिर्यग्गतिः रौद्रध्यानेन गच्छति नरकम्। धर्मेण देवलोके, सिद्धिगतिः शुक्लध्यानेन ॥ २ ॥ शब्दादिविषयगृद्धः सद्धर्मपराङ्मुखः प्रमादपरः। जिनमतमनपेक्षमाणो वर्त्तते आर्ते ध्याने ॥ ३ ॥ परव्यसनमभिनन्दयिता निरपेक्षो निर्दयो निरनुतापः। हृष्यति कृतपापो रौद्रध्यानोपगतचित्तः ॥ ४ ॥ जिनसाधुगुणोत्कीर्त्तनप्रशसनः दानविनयसंपूर्णः। श्रुतशीलसंयमरतः धर्मध्यानी ज्ञातव्यः ॥५॥ अथ क्षान्तिमार्दवार्जवमुक्तयो जिनमते प्रधानाः। आलम्बनैर्यैः शुक्लध्यानं समारोहति ॥ ६ ॥

कोटिरणोऽपहम् ॥ ५ ॥ यतः—×झाणं चउव्विहं होइ, तत्थ पिंडत्थयं पयत्थं च । रूवत्थं रूवाईय, एएसिमिमं च वक्खाणं ॥ ६ ॥ देहत्थं गयकम्मं, चंदाभं नाणिणं विऊ जत्थ । परमेसरीयं अप्पं, पिच्छइ तं होइ पिंडत्थं ॥ ७ ॥ मन्तक्खराणि सारीरपउमपत्तेसु चिंतए जत्थ । जोगी गुरूवएसा, पयत्थमिह वुच्चए तं तु ॥ ८ ॥ पणतीस सोल छप्पण, चउ दुगमेगं च जाव झाएह । परमेट्ठिवाययाणं, अन्नं च गुरूवएसेणं ॥ ९ ॥ तत्र पञ्चपरमेष्ठिपदैः ३५, अरिहंतसिद्धआयरियउवज्झायसाहु १६, अरिहंतसिद्ध ६, असिआउसा ५, अरिहंत ४, सिद्ध २, अ० १, अथवा ॐ, तत्र अकारो लक्षयोजनप्रमाणः सुवर्णाभोऽमृतश्रावी स्वभावस्थो ध्येयः, ॐकारः काञ्चनाभो लोकालोकप्रमाणः विद्यासहस्रस्थानं सर्वदेवपूज्यः सर्वशान्तिकरः पञ्चपरमेष्ठिप्रथमाक्षरसंभवः सर्वदा ध्येयः, जं पुण सपाडिहेरं, समुसरणत्थं जिणं परमनाणिं । पडिमाइसमारोवियं, झायइ तं होइ रूवत्थं ॥ १० ॥ जं परमाणंदमयं, परमप्पाणं निरंजणं सिद्धं । झाएइ परमयोगी, रूवाईयं तमिह झाणं ॥ ११ ॥ ध्यानं विधित्सता ज्ञेयं, ध्याता ध्येयं तथा फलम् । सिद्धयन्ति न हि सामग्रीं, विना कार्याणि कर्हिचित् ॥ १२ ॥ इन्द्रियैः

---

× ध्यानं चतुर्विधं भवति, तत्र पिण्डस्थं च । रूपस्थं रूपातीतं एतेषामिदं च व्याख्यानम् ॥ ८ ॥ देहस्थं गतकर्माणं चन्द्राभं ज्ञानिनं विद्वान् यत्र । परमैश्वर्यमात्मानं प्रेक्षते तद्भवति पिण्डस्थम् ॥ ९ ॥ मन्त्राक्षराणि शारीरपद्मपत्रेषु चिन्तयेद्यत्र । योगी गुरूपदेशात् पदस्थमिहोच्यते ततु ॥ १० ॥ पञ्चत्रिंशतं षोडशषट् पञ्च चत्वारि द्वे एकं च यावध्ध्यायत । परमेष्ठिवाचकानामन्यच्च गुरूपदेशेन ॥११॥ यत्पुनः सप्रतिहार्यं समवसरणस्थं जिनं परमज्ञानिनम् । प्रतिमादिसमारोपितं ध्यायति तद्भवति रूपस्थम् ॥१२॥ यत्परमानन्दमयं परमात्मानं निरंजनं सिद्धम् । ध्यायति परमयोगी, रूपातीतं तदिह ध्यानम् ॥ १३ ॥

सममाकृष्य, विषयेभ्यः स्वमानसम् । धर्मध्यानकृते तस्मान्मनः कुर्वीत निश्चलम् ॥ १३ ॥ विरतः कामभोगेभ्यः, स्वशरीरेऽपि निःस्पृहः । संवेगहृदनिर्मग्नः, सर्वत्र समतां भयेत् ॥ १४ ॥ सुमेरुरिव निष्कम्पः, शशीवानन्ददायकः । समीर इव निस्सङ्गः, सुधीर्ध्याता प्रशस्यते ॥ १५ ॥ आत्मनश्चिन्मयं रूपं, परब्रह्मैकतां गतम् । स्वदेहस्थं सदा ध्येयं, सुधियोपाधिवर्जितम् ॥ १६ ॥ निवेश्य हृदयाम्भोजे, पदानि परमेष्ठिनाम् । तद्वर्णे लयलीनात्मा, ध्यायेतानन्दमेदुरः ॥ १७ ॥ अर्हन्तं कर्मनिर्मुक्तं, केवळज्ञानभास्करम् । आसीनं समवसृतौ, प्रातिहार्यविराजितम् ॥ १८ ॥ ध्यानालम्बनतां नीत्वाऽथवा मूर्तिं जिनेशितुः । मनसः स्थिरतां कुर्यान्निर्विकल्पं समाधिमान् ॥१९॥ क्रमेणाभ्यासयोगेन, सम्यग्योगविदग्रणीः । संध्यायेत्परमात्मानं, निराकारं निरञ्जनम् ॥ २० ॥ प्रच्छन्नपाप्मनः शुद्धिरिहाधिव्याधिनिर्गमः । परत्र परमैश्वर्यं, पदस्थध्यानसिद्धितः ॥ २१ ॥ अतीतानागतार्थानां, वेदिताऽष्टसमृद्धयः । बिन्दुनादवपुःशुद्धिः, पिण्डस्थध्यानयोगतः ॥ २२ ॥ रूपस्थध्यानलीनात्मा, क्लिष्टकर्मक्षयात् शमी । लभते केवलज्ञानं, प्राणी पुण्याढ्यभूपवत् ॥ २३ ॥ रूपातीतपदं ध्यायन्निष्कषायो विकल्पमुक् । ध्याता रूपविनिर्मुक्तश्चिदानन्दमयो भवेत् ॥ २४ ॥ तथा सुश्रावकेणाप्येतत्स्थानकं कुर्वता प्रमादपरिहारार्थं रागद्वेषपरिहाररूपं बहुशोऽपि सामायिकव्रतं विधेयं. यतः—* जीवो पमायबहुलो, बहुसोऽवि य बहुविहेसु अत्थेसु । एएण कारणेणं, बहुसो सामाइयं कुज्जा ॥ २५ ॥ जो समो सव्वभूएसु, तसेसु थावरेसु अ । तस्स सामाइयं होइ, इइ केवलि-

* जीवः प्रमादबहुलो बहुशोऽपिच बहुविहेष्वर्थेषु । एतेन कारणेन बहुशः सामायिकं कुर्यात् ॥२६॥ यः समः सर्वभूतेषु त्रसेषु स्थावरेषु च । तस्य सामायिकं भवति इति केवलिभाषितम् ॥२६॥

भासियं ॥ २६ ॥ जन्मलक्षव्रतैरुग्रैर्यन्नैव क्षीयते क्वचित् । मनः शमरसे लग्नं, तत्कर्म क्षपयेत्क्षणात् ॥ २७ ॥ शुक्ललेश्या विशुद्धात्मा, शुभध्यानसमाधिमान् । लभते तीर्थकृल्लक्ष्मीं, हरिवाहनभूपवत् ॥ २८ ॥



## ध्यानोपरिहरिवाहन नृपकथा—

श्रीसाकेतपुरे पुण्यनृपोऽभूद्धरिवाहनः । विवस्वानिव तेजस्वी, सच्चक्रानन्दिमण्डलः ॥ २९ ॥
युवराजोऽभवन्मेघवाहनस्तस्य सोदरः । विदुषां विद्विषां चक्रे, स वीरः सर्वदादरम्[1] ॥ ३० ॥
नानाक्रीडारसास्वादविवशात्मा विशांपतिः । प्रमादपरवान् धर्मं, न करोत्यर्हतोदितम् ॥ ३१ ॥ यतः—

*आलस्समोहऽवन्ना, थंभा कोहा पमाय किविणत्ता । भयसोगा अन्नाणा, वक्खेवकुऊहलारमणा ॥ ३२ ॥ एएहिं कारणेहिं, लद्धूण सुदुल्लहंपि मणुअत्तं । न लहइ सुइं हियकरिं, संसारुत्तारिणिं जीवो ॥ ३३ ॥ तत्रान्यदा चतुर्ज्ञानी, भव्याम्भोरुहभास्करः । शीलभद्राह्वयः सूरिप्रवरः समवासरत् ॥ ३४ ॥ युवराजस्तमानन्तुं, विनीतः समुपागमत् । स श्राद्धश्रेष्ठिसामन्तव्यवहारिपुरस्कृतः ॥ ३५ ॥ निर्माय द्वादशावर्त्तवन्दनां विधिना पुरः । गुरुस्तस्योपविष्टस्य, यावद्धर्मं प्रकाशयेत्

---

१ विद्वत्पक्षे शश्वदादरं द्विट्पक्ष नित्यं भयं. ※ आलस्यं १ मोहः २ अवज्ञा ३ स्तम्भः ४ क्रोधः ५ प्रमादः ६ कृपणत्वम् ७ । भयं ८ शोकः ९ अज्ञानं १० व्याक्षपः ११ कुतूहलं १२ रमणम् १३ ॥३२॥ एतैः कारणैर्लब्ध्वाऽपि सुदुर्लभं मनुजत्वम् । न श्रुतिं हितकरीं संसारोत्तारिणीं जीवः ॥ ३३ ॥

॥ ३६ ॥ भवितव्यतया तावन्नरेन्द्रो वाजिकेलये । व्रजंस्तत्रागतोऽश्रौषीद्गिरं तेषां सुधाश्रवाम् ॥ ३७ ॥ वाजिक्रीडां परित्यज्य, विस्मितात्मा नरेश्वरः । तत्रागत्य पदाम्भोजं, ववन्दे वन्दे विनयी गुरोः ॥३८॥ यतः—विनयं राजपुत्रेभ्यः, पण्डितेभ्यः सुभाषितम् । अनृतं द्यूतकारेभ्यः, स्त्रीभ्यः शिक्षेच्च कैतवम् ॥ ३९ ॥ प्रतिध्वनिविधायिन्या, सुधासोदरया गिरा । तदग्रे विदधे धर्मदेशनां श्रीगुरुस्तदा ॥ ४० ॥

आर्यदेशकुलरूपबलायुर्बुद्धिबन्धुरमवाप्य नरत्वम् । धर्मकर्म न करोति जडो यः पोतमुज्झति पयोधिगतः सन् ॥४१॥

येन प्रभुस्वजनवैभवदेहगेहे, चिन्तातुरेण सुकृतं न कृतं कदाचित् ।

वैवाहिकव्यतिकराकुलितस्य तस्य, नो पाणिपीडनविधिः स्मृतिमाजगाम ॥ ४२ ॥

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं, व्यापारैर्बहुभारकर्मगुरुभि कालो न विज्ञायते ।

दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च, नोत्पद्यते, पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ४३ ॥

विषयाः पञ्च निद्राश्च, चतस्रो विकथास्तथा । कषायाः षोडश द्वेधा, मद्यं चेति जिनोदितैः ॥ ४४ ॥

द्वारैर्द्वात्रिंशतोत्सिक्तं, प्रमादं हन्ति यो रिपुम् । सोऽत्र मगधवेश्येव, लभते विजयध्वजम् ॥ ४५ ॥ युग्मं ॥

अभूद्राजगृहे पुण्यलक्ष्मीलीलागृहे पुरे । वेश्या मगधसेनाख्या, विख्याता रूपसंपदा ॥४६॥ अन्या विज्ञाननृत्यादिकलानां कुलमन्दिरम् । सुरेन्द्रसुन्दरीतुल्या, नाम्ना मगधसुन्दरी ॥ ४७ ॥ परस्परं तयो रूपसौन्दर्याखर्वगर्वयोः । निजानेककलाभ्यासे, विवादोऽभूद्दिवानिशम् ॥ ४८ ॥ ततो भूपादिभिः प्रोचे, तयोर्दर्पाभिभूतयोः । दर्शयतां कलां स्वां स्वां, संसदः

पुरतोऽधुना ॥ ४९ ॥ ततो मगधसेना स्वं, गीतनृत्यादिकौशलम् । संसदोऽदर्शयत्तस्या, विस्मयो नाभवत्परम् ॥ ५० ॥ सर्वाङ्गाद्भुतसौभाग्या, कलां दर्शयितुं निजाम् । रङ्गमण्डपमायासीत्ततो मगधसुन्दरी ॥ ५१ ॥ रत्नस्वर्णाद्यलङ्कारस्फारोदारवपुःश्रियम् । उत्फुल्ललोचनः कस्को, नापश्यद्विस्मयेन ताम् ॥ ५२ ॥ विषमिश्रमहाम्रूचि–संयुतायां तु तद्भुवि । कर्णिकाररङ्गपुष्पाणि, न्यग्मुखानि दुराशया ॥ ५३ ॥ कलिकाः सहकाराणां, तेषामुपरि सर्वतः । मोचिता गुरुणा स्वेन, तया मगधसेनया ॥ ५४ ॥ विमुच्य कर्णिकाराणि, सौरभ्यनिभृतान्यपि । पतन्तीं भ्रमरश्रेणिं, प्रत्याम्रकलिकोत्करम् ॥ ५५ ॥ माता मगधसुन्दर्या, विदग्धाऽऽवलिमण्डनम् । निधाय कथयामास, गीतमध्येन तद्यथा ॥ ५६ ॥ भ्रमराः कर्णिकाराणि, दूरतः सुरभीण्यपि । विमुच्य सहकाराणां, मञ्जरीं समुपासते ॥ ५७ ॥ अर्थतः त्रिभिर्विशेषकम् ॥ विज्ञाय तदभिप्रायं, साऽपि वक्रोक्तिकोविदा । अप्रमत्ततया तानि, परित्यज्याखिलान्यपि ॥ ५८ ॥ सृजन्ती चरणन्यासं, गीतनृत्यकलां निजाम् । अदर्शयत्तया तत्र, दक्षा मगधसुन्दरी ॥ ५९ ॥ अमन्दानन्दनिस्पन्द–मग्ना राजादयो यथा । हेममाणिक्यरत्नानि, तदुस्तस्यै यथोचितम् ॥ ६० ॥ त्रिभिर्विशेषकं ॥ कलावतीषु सर्वासु, तथा पण्याङ्गनास्वसौ । छत्रचामरसंयुक्तां, लेभे जयपताकिकाम् ॥ ६१ ॥ लोके मगधसेना तु, भूभृताद्यपमानिता । स्वनाट्यगुरुणा साकं, लेभे सर्वत्र लाघवम् ॥ ६२ ॥ एवं यः पुण्यकार्येषु, न प्रमादं सृजेज्जनः । सोऽभीष्टां लभते सिद्धिं, सुखसंभारशालिनीम् ॥ ६३ ॥ निशम्येति गुरोः पार्श्वे, संवेगरससागरः । शिश्राय संयमं राजा, निजान्तःपुरसंयुतः ॥ ६४ ॥ युवराजस्ततो राज्येऽभिषिक्तः सचिवादिभिः । राजेन्द्रलक्षणश्रेणिलक्षितो मेघवाहनः ॥ ६५ ॥ नरवाहनराजर्षिं, वन्दित्वा मेघवाहनः । सद्दर्शनसखं श्राद्धधर्ममार्गमशिश्रियत् ॥ ६६ ॥

१ झरवुं–टपकवुं.

अधीत्य द्वादशाङ्गानि, राजर्षिस्तत्त्वविद् गुरोः । श्रीमद्राख्यमुनीन्द्रस्य, समिपे श्रुतवानिति ॥ ६७ ॥ विंशतिस्थानकान्येव, तीर्थकृत्पदसंपदः । आश्रया (वा) मुनिभिः ख्याता, अर्हद्भक्तिमयात्मनः ॥ ६८ ॥ तेषु त्रयोदशस्थाने, शुभध्यानं निरन्तरम् । विधेयं श्रीमता सम्यग्, साम्यवासितचेतसा ॥ ६९ ॥

रुध्वा योगी कषायप्रसरमतिबलानिन्द्रियाश्वान्नियम्य, त्यक्त्वा व्यासङ्गमन्यं परमसुखपदप्राप्तये बद्धबुद्धिः ।
कृत्वा चित्तं स्थिरं स्वं शमरसकलितं सत्त्वमालम्ब्य गाढं, ध्यानं ध्यातुं यतेत प्रतिदिनममलं शुद्धधर्मा मुनीन्द्राः ॥७०॥
आत्मन्येव मनो नियुज्य विषयद्वाराणि सर्वात्मना, योगेन प्रति रुद्ध्य शुद्ध्यति पुनर्योगीश्वरः कोऽपि यः ।
तस्य स्यादमनस्कतापरिचयात् पञ्चेन्द्रियस्याप्यहो, स्पष्टानिन्द्रियता मनः स्थिरतरं तत्त्वावबोधोदयः ॥ ७१ ॥
ध्यानाभ्यासाद्विषयविमुखोद्भूतसाम्योपयुक्तादात्मारामस्तदनु तनुते शाश्वतं स्वस्य तेजः ।
तस्य ज्ञानं प्रभवति विषं व्याधयो वा न जन्तोः, देहैर्मुक्तः स भवति ततः कोऽपि लोकोत्तरश्रीः ॥ ७२ ॥

इत्याकर्ण्य गुरोर्वाचं, स्थानं कुर्वंस्त्रयोदशम् । अप्रमत्तः शुभध्यानं, विदधे सर्वदापि सः ॥७३॥ निष्कषायमना मौनी, निःस्पृहैकशिरोमणिः । सर्वसङ्गविमुक्तात्मा, कायोत्सर्गासनोऽनिशम् ॥७४॥ शुक्ललेश्यान्वितो योगी, सुखदुःखसमाश्रयः । इहापि परमानन्दवर्गिकामन्वभूदसौ ॥७५॥ अन्यदा त्रिदशस्वामी, प्रशंसां तस्य निर्ममे । अक्षोभ्योऽयं मुनिर्ध्यानान्नूनं नाकिशतैरपि ॥ ७६ ॥ पौलोमी भुवमायाताऽश्रद्दधाना हरेर्वचः । ततो देवाङ्गनावृन्दं, मोहसैन्यमिवोत्कटम् ॥ ७७ ॥ गीतनृत्यकलाकेलिं, दर्शयद्दर्शनमियम् । आविष्कृत्य मुनेस्तस्य, पुरः स्फुरदुरुद्युति ॥ ७९ ॥ षण्मासीं क्षोभयामास, स्वाङ्गोपा-

शुभप्रकाशनैः। दुष्प्रापैर्देहिनामल्पसत्त्वानां च स्पृहावहैः ॥ ७९ ॥ त्रिभिर्विशेषकं ॥ नासाग्रन्यस्तनेत्रस्य, न परं तस्य सन्मुनेः। क्षणमात्रमपि स्वान्तं, क्षोभमाप मानगपि ॥ ८० ॥ इन्द्राग्रमहिषो प्रादुर्भूय भूयः स्वशक्तितः। ततो राजर्षिमानम्य, ययौ धाम सुधाभुजाम् ॥ ८१ ॥ स्वसत्त्वीकृत्य तीर्थेशकर्म शर्मादृभुतं तनः। सनत्कुमारे देवोऽभूत्, राजर्षिर्वासवोपमः ॥ ८२ ॥ ततश्च्युतो विदेहोर्व्यां, कल्पनाकल्पपादपः। भावी जिनेश्वरः श्रीमान्, राजा श्रीहरिवाहनः ॥ ८३ ॥ निर्जराया निमित्तेषु, समता स्याद् गरीयसी। यया मुहुर्त्तमात्रेण, जन्तुर्याति पवित्रताम् ॥ ८४ ॥ यतः—प्रणिहन्ति क्षणार्द्धेन, साम्यमालम्ब्य कर्म तत्। यन्न हन्यान्नरस्तीव्रतपसा जन्मकोटिभिः ॥ ८५ ॥ श्रुत्वेति वृत्तं हरिवाहनस्य, सम्यक् शुभध्यानफलोज्ज्वलस्य। तीर्थंकरश्रीसुखसाधनेषु, पदेषु चेतो रमयत्वमीषु ॥ ८६ ॥

**इति हरिवाहननृपकथानकं ॥**

## मनः शुद्धिस्वरूपम्

तद्ध्यानं मनसः शुद्ध्या भवति मनसः शुद्धेः स्वरूपमाह—

मनःक्षपाचरो भ्राम्य-न्नपशङ्कं निरङ्कुशः। प्रपातयति संसारावर्त्तगर्त्ते जगत्रयीम् ॥ १ ॥
तप्यमानांस्तपो मुक्तौ, गन्तुकामान् शरीरिणः। वात्येव तरलं चेतः, क्षिपत्यन्यत्र कुत्रचित् ॥ २ ॥
अनिरुद्धमनस्कः सन्, योगश्रद्धां दधाति यः। पद्भ्यां जिगमिषुर्ग्रामं, स पङ्गुरिव हस्यते ॥ ३ ॥

मनोरोधे निरुध्यन्ते, कर्माण्यपि समन्ततः । अनिरुद्धमनस्कस्य, प्रसरन्ति हि तान्यपि ॥ ४ ॥
मनःकपिरयं विश्व-परिभ्रमणलम्पटः । नियन्त्रणीयो यत्नेन, मुक्तिमिच्छुभिरात्मनः ॥ ५ ॥
दीपिका खल्वनिर्वाणा, निर्वाणपथदर्शिनी । एकैव मनसः शुद्धिः, समाम्नाता मनीषिभिः ॥ ६ ॥

उ०—ज्ञाने ध्याने दाने, माने मौने सदोद्यतो भवतु । यदि निर्मलं न चित्तं, तदा हुतं भस्मनि समग्रम् ॥ १ ॥

सत्यां हि मनसः शुद्धौ, सन्त्यसन्तोऽपि यद्गुणाः । सन्तोऽप्यसत्यां नो सन्ति, सैव कार्या बुधैस्ततः ॥ ७ ॥
मनःशुद्धिमबिभ्राणा, ये तपस्यन्ति मुक्तये । त्यक्त्वा नावं भुजाभ्यां ते, तितीर्षन्ति महार्णवम् ॥ ८ ॥
तपस्विनो मनःशुद्धि विनाभूतस्य सर्वथा । ध्यानं खलु मुधा चक्षु-र्विकलस्येव दर्पणः ॥ ९ ॥
तदवश्यं मनःशुद्धिः, कर्तव्या सिद्धिमिच्छता । तपःश्रुतयमप्रायैः, किमन्यैः कायदण्डनैः ॥ १० ॥

## जयसेनाप्रबन्धः

अत्रार्थे जयसेनायाः प्रबन्धोऽभिधीयते—

उज्जयिन्यां संग्रमशूरो नृपोऽभूत् । तत्र वृषभश्रेष्ठी । तस्य कलत्रं जयसेना सम्यक्त्वगुणविशिष्टा पत्यनुगाऽभवत् । परं वन्ध्यत्वदोषान्विता । सा स्वामिनं मत्येकदा प्राह—"स्वामिन् सन्तानार्थं विवाहं कुरु । पुत्रं विना नौ कुलं न शोभते । यदुक्तम्—

"यत्र नो स्वजनसंगतिरुच्चैर्यत्र नो लघुलघूनि शिशूनि ।
यत्र नास्ति गुणगौरवचिन्ता, हन्त तान्यपि गृहाण्यगृहाणि ॥ १ ।"

श्रेष्ठिना भणितं—"भो भद्रे ! त्वयोक्तं सत्यं, परं विषयादिसुखनिरपेक्षं मच्चित्तं वर्तते"। तयोक्तं—'स्वामिन् ! सन्तानार्थं न दुष्टमिदं' । ततः श्रेष्ठी मौनं कृत्वा स्थितः । तया कस्यचिदिभ्यस्य कन्यां गुणसुन्दरीं याचयित्वा परिणायितः । ततः शनैर्जयसेना सपत्न्यां सर्वं गृहभारमारोप्य स्वयं धर्माभिमुखी जाता । क्रमेण गुणसुन्दर्याः पुत्रोऽभूत् । एकदा बन्धुश्रियया निजां सुतां प्रत्युक्तं—'भोः पुत्रि ! तव सुखमस्ति ?' गुणसुन्दर्या प्रोक्तं—"हे मातः ! सपत्न्युपरि मां दत्वा किं सौख्यं पृच्छसि ? प्रथमं मुंडनं कृत्वा पश्चान्नक्षत्रं पृच्छसि, जलं पीत्वा गृहं च । ममेषन्मात्रमपि सौख्यं नास्ति । मम प्रियोऽपि सपत्न्यां रक्तोऽस्ति" । बन्धुश्रियोक्तं—"हे वत्से ! रागेण कलया च तया यदि वृद्धोऽसौ वाह्यते तदाऽपरस्य किं ? । यदुक्तम्—

वायुना यत्र नीयन्ते कुञ्जराः षष्टिहायनाः । गावस्तत्र न गण्यन्ते मशकेषु च का कथा ॥ १ ॥

तथापि हे पुत्रि ! त्वं स्वस्था भव । त्वत्सपत्नीविनाशोपायं करिष्ये । त्वं भर्तुर्गृहे व्रज" । तत एकदा भिक्षार्थमागतं रुद्रमूर्तिमिव सातिशयं कापालिकं दृष्ट्वा स्वकार्यकरणायानेकरसयुतान्नं दत्तं तस्मै । यतः—

कार्यार्थी भजते लोको न कश्चित् कस्य चित् प्रियः । वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम् ॥ १ ॥

सोऽपि नित्यं भिक्षार्थमेति । सा नवनवां भिक्षां ददाति । एकदा प्रत्युपकाराय तामाह—'हे मातर्यत्तव कार्यं

स्यात्तत्कथय, यथाहं करोमि'। तया सगद्गदकण्ठं पुत्रीदुःखं कथितं। तच्छ्रुत्वाह योगी–"हे मातर्जयसेनां मंत्रेण हत्वा मद्भगिनीं सुखिनीं न करोमि तदाग्निं प्रविशामि"। इति सन्धां कृत्वा स्मसाने गतः। ततश्चतुर्दश्यां प्रेतवने एकं मृतकमानीय पूजयित्वा वैतालीविद्याजापेन तेन तच्छवे वेताली प्रत्यक्षीकृता। सा तं प्रत्याह–'हे योगीन्! यत्कार्यं तत्समादिश'। तेनोक्तं––'हे महाविद्ये! जयसेनां मारय'। तथेति स्वीकृत्य तत्समीपे समागत्य यावद्विलोकयति तावत्तां सम्यक्त्वस्थिरचित्तां कायोत्सर्गस्थां दृष्ट्वा सा वेताली धर्ममहिम्ना विगतामर्षा तां प्रदक्षिणीकृत्य व्याघुट्य वने गता। तां विकरालां दृष्ट्वा योगी भयेन पलायितः। तेनान्येद्युः द्वितीयवारं प्रेरितापि तस्यां विरूपं कर्तुमक्षमाऽट्टाट्टहासं मुक्त्वा गता। एवं वारत्रयमभूत्। चतुर्थवेलायां निजावसानभयेन योगीनोक्तं––'भो देवि! द्वयोर्मध्ये या दुष्टा तां शीघ्रं मारय'। ततो देवगुरुभक्तां जयसेनां विमुच्य कायचिन्तार्थमुत्थितां तां प्रमादिनीं गुणसुन्दरीं खड्गेन विनाश्य साधकाज्ञया सा स्वस्थाने गता। ततो जयसेना कायोत्सर्गं समाप्य बहिरागता तां सपत्नीं तथाभूतां वीक्ष्य चिन्तयतिस्म––'अहो पूर्वकर्मतो मे एष कलंकः समायातः'। एवं विचिन्त्योपद्रवक्षयार्थं पुनः स्मरणं चकार। इतः प्रत्यूषे रजन्यां किं वृत्तमिति गवेषणार्थमुत्सुका बन्धुश्रीः पुत्रीगृहे समागता। पुत्री कालकृतां दृष्ट्वा पुत्कारं कृत्वा नृपं प्रत्याह––'हे राजन्! मम सुता जयसेनया सपत्नीति मत्सरेण हता। ततो राज्ञा रुष्टेनाकारिता। पृष्टा सती यावन्न वदति तावच्छासनदेव्या प्रेर्यमाणो योगी नगरमध्ये वदन् राजसंसदि सहसा स्वकीयं रौद्ररूपं प्रकटीकृत्य प्राह––'निष्कलंकां जयसेनां मुक्त्वा समत्सरा गुणसुन्दरी मया निहता 'इत्युक्त्वा सर्वं स्वरूपं प्रोक्तम्। देवतया सा पुष्पादिभिः पूजिता। बन्धुश्रीर्नगरान्निर्घाटिता। ततो राज्ञा जयसेनां

प्रत्युक्तं--'भोः साध्वि ! वद, जगत्सु को धर्मः श्रेष्ठः ?' सा प्राह--"जैनादृते सर्वेऽप्येकान्तिनः स्याद्वादराद्धान्ताज्ञा न न्याय्याः, बहुदोषदूषितत्वात्"। इति श्रुत्वा पुनर्नृपः पप्रच्छ--'हे शीलसुगन्धे ! गंगाप्रयागादितीर्थेषु मध्ये किं तीर्थं तारकं ?' सा प्राह--'हे नृप! अष्टषष्टितीर्थानि लोके सन्ति, तानि न स्वात्मधर्मसमर्थकानि। तीर्थं त्वेकः सिद्धाचल एव। यत्र गिरौ कार्तिकशुक्लपूर्णिमादिने द्राविडवालिखिल्लौ दशकोटिमुनिभिः सह मुक्तिं गतौ। फाल्गुनशुक्लदशमीदिने नमिविनम्याख्यौ द्विकोटिमुनिभिः सह सिद्धौ। फाल्गुनशुक्लाष्टमीदिने श्रीयुगादिदेवः नवनवतिपूर्ववारान् यावदत्र समागात्। श्रीशान्तिजिनेनात्र चातुर्मासकं कृतं। तदा सप्तदशकोटिनरा मुनिलिङ्गेन तथा गृहिलिङ्गेन सिद्धाः। तथा च द्वितीयजिनहस्तदीक्षितसाधवः पञ्चनवतिसहस्रमिता अत्र वर्षाकाले स्थिताः। तेषु मध्ये कार्तिकशुक्लपूर्णिमादिने दशसहस्रमिताः केवलं प्राप्य सिद्धाः आश्विनशुक्लराकायां पञ्च पाण्डवा विंशतिकोटिव्रतिभिः सह सिद्धाः। फाल्गुनशुक्लत्रयोदशीदिने शाम्बप्रद्युम्नकुमारौ सार्धत्रिकोटिमुनिभिः सह सिद्धौ॥ श्री कालस(कालिक)मुनिः सहस्रसंयमिभिः सह सिद्धः। श्रीसुभद्रमुनिः सप्तशतयतिभिः सह सिद्धः श्रीरामचन्द्रः पञ्चकोटिभिः सह, श्रीरामभ्राता भरतस्त्रिकोटिभिः सह, श्रीवसुदेवस्य द्वासप्ततिसहस्रस्त्रिमध्ये पञ्चत्रिंशित्सहस्रस्त्रियः सिद्धगिरौ मुक्तिं गता॥ सप्तत्रिंशत्सहस्रस्त्रियोऽन्यत्र सिद्धिं प्रापुः। देवकीरोहिण्यौ तु आगामिकाले जिनत्वं प्राप्स्यतः। सुकोशलर्षिर्व्याघ्रीकृतोपसर्गेण पंगुलगिरौ सिद्धः। इत्याद्यनन्तसाधवोऽत्र सिद्धाः सेत्स्यन्ति च। तथा श्रीचैत्रपूर्णिमादिनेऽत्र गिरौ श्रीपुंडरीकगणभृत् पञ्चकोटिमुनिभिः सह सिद्धः। अतो हे नृप! समस्ततीर्थयात्राफलं सकृत् शत्रुञ्जयतीर्थे दृष्टे स्यात्"। इति श्रुत्वा नृपादयः सर्वेऽपि श्रीजिनशासनधर्मं श्रीसिद्धाचलं तीर्थं

च स्वीचक्रुः । ततो राज्ञा सा समहं गृहे प्रेषिता । क्रमेण प्रव्रज्यां संगृह्य सा वर्णनीयपदमवाप ।

स्याद्वादराद्धान्तविचारचेताः, कुदर्शनाशंसनमुक्तरागा ।
जयादिसेना मनसः प्रशस्त्या, क्रमेण सानन्तसुखं समाप ॥ १ ॥

## क्रोधविजयः

सा मनःशुद्धिः कषायविजयेन भवति, ते च कषायाः चत्वारः सन्ति तत्रादौ-क्रोधस्वरूपमाह—

स्युः कषायाः क्रोधमान-मायालोभाः शरीरिणाम् । चतुर्विधास्ते प्रत्येकं, भेदैः संज्वलनादिभिः ॥ १ ॥
पक्षं संज्वलनः प्रत्या-ख्यानो मासचतुष्टयम् । अप्रत्याख्यानको वर्षं, जन्मानन्तानुबन्धकः ॥ २ ॥
वीतरागयतिश्राद्ध-सम्यग्दृष्टित्वघातकाः । ते देवत्व-मनुष्यत्व-तिर्यक्त्वनरकप्रदाः ॥ ३ ॥
तत्रोपतापकः क्रोधः, क्रोधो वैरस्य कारणम् । दुर्गतेर्वर्तनीक्रोधः क्रोधः शमसुखार्गला ॥ ४ ॥
उत्पद्यमानः प्रथमं, दहत्येव स्वमाश्रयम् । क्रोधः कृशानुवत्पश्चादन्यं दहति वा न वा ॥ ५ ॥

आ०—अर्जितं पूर्वकोट्या यद्-वर्षैरष्टभिरूनया । तपस्तत् तत्क्षणादेव, दहति क्रोधपावकः ॥ ६ ॥ शमरूपं पयः प्राज्य-पुण्यसंभारसंचितम् । अमर्षविषसंपर्का-दसेव्यं तत्क्षणाद् भवेत् ॥ ७ ॥ चारित्रचित्ररचनां, विचित्रगुणधोरणीम् । समुत्सर्पन् क्रोधधूमः, श्यामलीकुरुतेतराम् ॥ ८ ॥ यो वैराग्यशमीपत्र-पुटैः समरसोऽर्जितः । शाकपत्रपुटाभेन, क्रोधेनो-

त्सृज्यते स किम् ? ॥९॥ प्रवर्धमानः क्रोधोऽयं, किमकार्यं करोति न ?। जज्ञे हि द्वारका द्वैपा-यनक्रोधानले समित् ॥१०॥ क्रुध्यतः कार्यसिद्धिर्या, न सा क्रोधनिबन्धना । जन्मान्तरार्जितोर्जस्वि-कर्मणः खलु तत्फलम् ॥११॥ स्वस्य लोकद्वयोच्छित्त्यै, नाशाय स्वपरार्थयोः । धिगहो ! दधति क्रोध, शरीरेषु शरीरिणः ॥१२॥ क्रोधान्धाः पश्य निघ्नन्ति, पितरं मातरं गुरुम् । सुहृदं सोदरं दारा-नात्मानमपि निर्घृणाः ॥१३॥

क्रोधवह्नेस्तदह्नाय, शमनाय शुभात्मभिः । श्रयणीया क्षमैवैक, संयमारामसारणिः ॥१४॥

आ०—अपकारिजने कोपो निरोद्धुं शक्यते कथम् । शक्यते सत्त्वमाहात्म्याद्-यद्वा भावनयाऽनया ॥१५॥ अङ्गीकृत्यात्मनः पापं, यो मां बाधितुमिच्छति । स्वकर्मनिहि(ह)तायास्मै, कः कुप्येद् बालिशोऽपि सन् ॥१६॥ प्रकुप्याम्यपकारिभ्य-इति चेदाशयस्तव । तत् किं न कुप्यसि स्वस्य, कर्मणे दुःखहेतवे ॥१७॥ अपेक्ष्य लोष्टक्षेप्तारं, लोष्टं दशति मण्डलः । मृगारिः शरमप्रेक्ष्य, शरक्षेप्तारमृच्छति ॥१८॥ यैः परः प्रेरितः क्रूरै-र्मह्यं कुप्यति कर्मभिः । तान्युपेक्ष्य परे क्रुध्यन्, किं भये भषणप्रियम् ॥१९॥ श्रूयते श्रीमहावीरः, क्षान्त्यै म्लेच्छेषु जग्मिवान् । अयत्नेनागतां क्षान्तिं, वोढुं किमिव नेच्छसि ॥२०॥ त्रैलोक्यप्रलयत्राण-क्षमाश्चेदाश्रिताः क्षमाम् । कदलीतुल्यसत्त्वस्य, क्षमा तव न किं क्षमा ! ॥२१॥ तथा किं नाकृथाः पुण्यं, यथा कोऽपि न बाधते ? । स्वप्रमादमिदानीं तु, शोचन्नङ्गीकुरु क्षमाम् ॥२२॥ क्रोधान्धस्य मुनेश्चण्ड-चण्डालस्य च नान्तरम् । तस्मात् क्रोधं परित्यज्य, भजोज्ज्वलधियां पदम् ॥२३॥ महर्षिः क्रोधसंयुक्तो-निष्क्रोधः कूरगड्डुकः । ऋषिं मुक्त्वा देवताभि-र्ववन्दे कूरगड्डुकः ॥२४॥ अरुन्तुदैर्वचःशस्त्रै-स्तुद्यमानो विचिन्तयेत् । चेत् तथ्यमेतत् कः कोपो-ऽथ मिथ्योन्मत्तभाषितम् ॥२५॥ वधायो-

पस्थितेऽन्यस्मिन्, हसेद् विस्मितमानसः । वधे मत्कर्मसंसाध्ये, वृथा नृत्यति बालिशः ॥२५॥ निहन्तुमुद्यते ध्याये-दायुषः क्षय एष नः । तदसौ निर्भयः पापात्, करोति मृतमारणम् ॥ २७ ॥ सर्वपुरुषार्थचौरे, कोपे कोपो न चेत् तव । धिक् त्वां स्वल्पापराधेऽपि, परे कोपपरायणम् ॥ २८ ॥ सर्वेन्द्रियग्लानिकरं विजेतुं, कोपं प्रसर्पन्तमिवोग्रसर्पम् । विद्यां सुधीर्जाङ्गुलिकीमिवान-वद्यां क्षमां संततमाद्रियेत ॥२९॥

## क्रोधोपरि सुरविप्रकथा

तेष्वप्यसौ क्रोधदवानलोऽङ्गिनां, प्रज्वालयत्यद्‌भुतपुण्यकाननम् ।
आसेवितो यः स्वपरोपतापकृत्, भवेदिहामुत्र च सूरविप्रवत् ॥ १ ॥

श्रीवसन्तपुरे राजा, बभूव कनकप्रभः । सर्वाधिकारी सर्वेष्टः, सुयशास्तत्पुरोहितः ॥ १ ॥ सूरस्तस्य सुतोऽत्यन्तकोपनः कलहप्रियः । योऽग्निवत् प्रज्वलन्नेव, नित्यं तिष्ठति दुष्टधीः ॥ २ ॥ पितरि स्वर्गतेऽन्येद्युः, कोपनत्वेन तत्सुतम् । मुक्त्वा पुरोहितपदे, भूभुजाऽन्यो निवेशितः ॥ ३ ॥ ततः स द्वेषमापन्न-स्तच्छिद्राणि गवेषयन् । नानाव्यापादनोपाया-स्तत्र भूपे व्यचिन्तयत् ॥ ४ ॥ दोहनावसरेऽन्येद्यु—र्लत्तया तं जघान गौः । तेन मर्म्माहता सा तु, वराकी मूर्च्छिता मृता ॥ ५ ॥ आः ! किमेतत्कृतं पाप !, गौरियं मारिता कुतः । इत्यादि यत्तज्जल्पन्ती, हतानेन स्वपत्न्यपि ॥ ६ ॥ जाते कलकले तत्र, प्राप्तैर्नृपभटैरयम् । निबध्योपनृपं नीतः, सोऽपि तं वध्यमादिशत् ॥ ७ ॥ नानाविडम्बनापूर्वं, ते नयन्ति

पुराद्बहिः । तावत्तत्पुण्ययोगेन, तापसः कोऽप्युपाययौ ॥ ८ ॥ स तानुवाच भो भद्राः !, कोऽयं किमिति मार्यते । ऊचुस्तेऽप्येष पुंरूपो, राक्षसः कोऽपि विद्यते ॥ ९ ॥ कृपया मोचितस्तेन, स तेभ्यः सामयुक्तिभिः । सूरोऽपि तापसीं दीक्षा-मादत्ते स्म तदन्तिके ॥ १० ॥ तप्त्वा तपांसि भूयांसि, तस्यैव नृपतेर्वधे । कृत्वा निदानं स मृतो, जातो वायुकुकुमारकः ॥ ११ ॥ वसन्तपुरमागत्य, तं भूपप्रमुखं जनम् । रजोभिः स्थगयामास, कटरे ! कोपविप्लवः ॥ ११ ॥ च्युत्वा ततोऽभूच्चण्डालः, प्रथमं नरकं ततः । जगाम कोपकिम्पाक-पादपच्छायमाश्रयन् ॥ १३ ॥ ततो दृग्विषसर्पो-ऽभूद्द्वितीये नरके ततः । ततोऽप्यनन्तसंसारं, भ्रान्तः कोपविडम्बितः ॥ १४ ॥ भूयस्यथ गते काले, श्रीपुरे रत्नभूभृतः । सूरजीवोऽभवद्ग्रामा-ध्यक्षो ब्राह्मणनन्दनः ॥ १५ ॥ तथैव कोपनत्वेन, स नृपेण सहान्यदा । कुर्वाणः कलहं राज-भटैरुल्लम्बितो वने ॥ १६ ॥ चतुर्ज्ञानधरं तत्र, प्राप्तं मुनिवरं तदा । आगतो वन्दितुं राजाऽशृणोत्तद्देशनामिति ॥ १७ ॥ भोः भोः ! भीमभवारण्ये, स्थिताः किं ? नश्यत द्रुतम् । यद्बद्धवैरा धावन्ति, वैरिणो वोऽनुगामिनः ॥ १८ ॥ वैरिणः क इति क्ष्माप-पृष्टो ज्ञानी पुनर्जगौ । कषायास्तेष्वपि क्रोधो, धत्ते वैरिषु धुर्यताम् ॥ १९ ॥ योऽयमुल्लम्बितो वृक्षे, पुरस्ताद्वीक्ष्यते नरः । इदं क्रोधफलं विद्धि. सर्वानर्थनिबन्धनम् ॥ २० ॥ सूरजन्मप्रभृतिकं, तच्चरितं तदाऽखिलम् । श्रुत्वा ज्ञानिमुनिप्रोक्तं, प्रतिबुद्धा नृपादयः ॥ ११ ॥ केचित्तस्यान्तिके दीक्षां, श्राद्धधर्म्मं च केचन । स्वीकृत्याभिग्रहादींश्च, स्वस्वकार्याण्यसाधयन् ॥ २२ ॥ सूरजीवोऽपि स क्ष्माप-च्छोटितः शान्ततां भजन् । दीक्षामादाय सञ्जातः, सर्वसौख्यैकभाजनम् ॥ २३ ॥ स्त्रीरूपाऽपि क्षमैवैका, क्रोधयोधं जयत्यमुम् । गुणाः परे तु तं जेतुं, पुंरूपा अपि न क्षमाः ॥ २४ ॥ आक्रुष्टोऽपि हतो वापि, न बालैः

कलहायते । मुनिः संसारभीरुत्वा-दन्यथा तत्समो भवेत् ॥२५॥ श्रूयते हि पुरा साधु-मेकमुग्रतपःपरम । देवता काचिद-भ्येत्यो-पास्ते तद्गुणरञ्जितः ॥२६॥ साधो! सुखेन चारित्रं, तव निर्वहते सदा । वपुरस्ति निराबाधं, नाप्यन्यः कोऽप्यु-पद्रवः ॥२७॥ देवो नरो वा यः कश्चि-द्विरूपं कुरुते तव । तदा वाच्यं ममेत्यादि—वार्त्ता नित्यं चकार सा ॥ २८ ॥ निःस्पृहो मुनिरप्याह, न मे किञ्चन दुष्करम् । यतः सन्तोषिणः सौख्यं, यत्तच्चक्रभृतोऽपि न ॥२९॥ पारणाहेऽन्यदा गच्छ-न्नगरान्तः स संयतः । अमङ्गलधियाभ्याप्त-द्विजेनैकेन कुट्टितः ॥ ३० ॥ मुनिरप्युच्छलन्मन्यु-र्मुष्टिभिस्तमताडयत् । मुष्टामुष्टि तयोरेवं, चिरं युद्धमजायत ॥३१॥ भोजनानन्तरे देवी, पप्रच्छ कुशलादिकम् । रुष्टः सोऽप्याह तत्र त्वं, नागता किं त्वयाऽधुना? ॥३२॥ मुने? तत्राहमायाता, परं त्वं नोपलक्षितः । उभयोर्युद्ध्यमानत्वाच्च-दानीं समता बभूत् ॥३३॥ क्षमातपोभ्यां युक्तत्वात्, क्षमाश्रमण उच्यते । तयोरेकतरस्यापि, नाशे नाम्नो निरर्थता ।'३४॥ इत्थं तया साधुरयं प्रबोधितो, बभूव चारित्रिजनावतंसकः । तत्क्रोधयोधो विजीगीषुभिर्भवं, जेतव्य एवोच्चपदस्पृहा यदि ॥ ३५॥

## मानविजयः

विनयश्रुतशीलानां, त्रिवर्गस्य च घातकः । विवेकलोचनं लुम्पन्, मानोऽन्धकरणो नृणाम् ॥ १ ॥

जातिलाभकुलैश्वर्य-बलरूपतपःश्रुतैः । कुर्वन् मदं पुनस्तानि, हीनानि लभते जनः ॥२॥

आ०—जातिभेदान् नैकविधा-नुत्तमाधममध्यमान् । दृष्ट्वा को नाम कुर्वीत, जातु जातिमदं सुधीः ॥३॥ उत्तमां

जातिमाप्नोति, हीनामाप्नोति कर्मतः । तत्राशाश्वतिकीं जातिं, को नामासाद्य माद्यतु ॥४॥ अन्तरायक्षयादेव, लाभो भवति नान्यथा । ततश्च वस्तुतत्त्वज्ञो, न लाभमदमुद्वहेत् ॥ ५ ॥ परप्रसादशक्त्यादि-भवे लाभे महत्यपि । न लाभमद-मृच्छन्ति, महात्मानः कथञ्चन ॥६॥ अकुलीनानपि प्रेक्ष्य, प्रज्ञाश्रीशीलशालिनः । न कर्तव्यः कुलमदो-महाकुलभवैरपि ॥७॥ किं कुलेन कुशीलस्य, सुशीलस्यापि तेन किम् । एवं विदन् कुलमदं, विदध्याद् न विचक्षणः ॥८॥ श्रुत्वा त्रिभुव-नैश्वर्य-संपदं वज्रधारिणः । पुरग्रामधनादीना-मैश्वर्ये कीदृशो मदः ॥९॥ गुणोज्ज्वलादपि भ्रश्येद्-दोषवन्तमपि श्रयेत् कुशीलस्त्रीवदैश्वर्यं, न मदाय विवेकिनाम् ॥१०॥ महाबलोऽपि रोगाद्यै-रबलः क्रियते क्षणात् । इत्यानित्ये बले पुंसां, युक्तो बलमदो न हि ॥११॥ बलवन्तोऽपि जरसि, मृत्यौ कर्मफलान्तरे । अबलाश्चेत् ततो हन्त !, तेषां बलमदो मुधा ॥१२॥ सप्तधातुमये देहे चयापचयधर्मिणि । जरारुजाभिभाव्यस्य, को रूपस्य मदं वहेत् ॥१३॥ सनत्कुमारस्य रूपं, तत्क्षयं च विचारयन् । को वा सकर्णः स्वप्नेऽपि, कुर्याद् रूपमदं किल ॥१४॥ नाभेयस्य तपोनिष्ठां, श्रुत्वा वीरजिनस्य च । को नाम स्वल्पतपसि, स्वकीये मदमाश्रयेत् ॥१५॥ येनैव तपसा त्रुट्येत्, तरसा कर्मसंचयः । तेनैव मददिग्धेन, वर्धते कर्मसंचयः ॥१६॥ स्वबुद्ध्या रचितान्यन्यैः, शास्त्राण्याघ्राय लीलया । सर्वज्ञोऽस्मीति मदवान्, स्वकीयाङ्गानि खादति ॥१७॥ श्रीम-द्गणधरेन्द्राणां श्रुत्वा निर्माणधारणे । कः श्रयेत श्रुतमदं, सकर्णहृदयो जनः ॥१८॥

उ०—द्रमकैरिव च दुष्कर्मक-मुपकारनिमित्तकं परजनस्य । कृत्वा यत् वाल्लभ्यक-मवाप्यते को मदस्तेन ॥१९॥ गर्वं परप्रसादात्मकेन, वाल्लभ्यकेन यः कुर्यात् । तद्वाल्लभ्यकविगमे, शोकसमुदयः परामृशति ॥२०॥ ग्रहणोद्ग्राहणनवकृति-

विचारणार्थावधारणाद्येषु । बुद्ध्यङ्गविधिविकल्पेष्वनन्तपर्यायवृद्धेषु ॥२१॥ पूर्वपुरुषसिंहानां, विज्ञानातिशयसागरमनन्तम् । ज्ञात्वा सांप्रतपुरुषाः, कथं स्वबुद्ध्या मदं यान्ति ? ॥२२॥

उत्सर्पयन् दोषशाखा-गुणमूलान्यधो नयन् उन्मूलनीयो मानद्रु-स्तन्मार्दवसरित्प्लवैः ॥ २३ ॥

आ०—मार्दवं नाम मृदुता, तच्चौद्धत्यनिषेधनम् । मानस्य पुनरौद्धत्यं, स्वरूपमनुपाधिकम् ॥२४॥ अन्तः स्पृशेद् यत्र यत्रौ-द्धत्यं जात्यादिगोचरम् । तत्र तस्य प्रतीकार-हेतोर्मार्दवमाश्रये ॥२५॥ सर्वत्र मार्दवं कुर्यात्, पूज्येषु तु विशेषतः । येन पापाद् विमुच्येत, पूज्यपूजाव्यतिक्रमात् ॥२६॥ मानाद् बाहुबलिर्बद्धो-लताभिरिव पाप्मभिः । मार्दवात् तत्क्षणं मुक्तः सद्यः संजातकेवलः ॥२७॥ चक्रवर्ती त्यक्तसङ्गो-वैरिणामपि वेश्मसु । भिक्षार्थं यात्यहो ! मान-च्छेदायामृदु मार्दवम् ॥२८॥ चक्रवर्त्यपि तत्काल-दीक्षितो रङ्कसाधवे । नमस्यति त्यक्तमान-श्चिरं च वरिवस्यति ॥२९॥ एवं च मानविषयं परिमृश्य, दोषं, ज्ञात्वा च मार्दवनिषेवणजं गुणौघम् । मानं विहाय यतिधर्मविशेषरूपं, सद्यः समाश्रयत मार्दवमेकताना: ॥३०॥

## मानोपरि उज्झितकुमार कथा

मानोऽपि मान्योऽस्तु मनस्विनां कथं, विडम्बयन्नष्टविधाभिरङ्गिनः ॥ १ ॥
यं प्राप्य स क्ष्मापतिपुत्र उज्झिता-भिधोऽपि जज्ञे निजजीवितोज्झितः ॥ १ ॥

अष्टविधमदफलं चेदम्—

रज्जाभोगे तिसिआ, अट्टवसट्टा पडंति तिरिएसु । जाईमएण मत्ता, किमिजाई चेव पावंति ॥ १ ॥ कुलमत्त सीआलत्ते, उट्टाईजाणि जंति रूवमए । बलमत्तावि पयंगा, बुद्धिमए बुक्कडा हुंति ॥ २ ॥ रिद्धिमए साणाई, सोहग्गमएण सप्पकागाई । लाभमएण बइल्ला, हवंति इअ अट्ठमयदुट्ठा ॥ ३ ॥ इति श्रीमहापुरुषचरित्रे ॥

राजा नन्दिपुरे रत्न- सारो नीतिलतावनम् । सिञ्चन्नम्बुदवत्सर्व-तापनिर्वापकोऽभवत् ॥ १ ॥ तस्य प्रेमलता राज्ञी, साक्षात्प्रेमलतेव या । कोऽपि जीवोऽन्यदा तस्याः, गर्भे समुदपद्यत ॥ २ ॥ अशुभा दोहदास्तस्याः, जातास्तदनुभावतः । नृपव्यापादनस्तैन्य-वञ्चनोल्लम्बनादयः ॥ ३ ॥ जातमात्रोऽपि बालोऽसौ, प्रच्छन्नं त्याजितस्तया । बहिर्बलिष्ठायुष्कत्वा-द्दाराको न मृतः परम् ॥ ४ ॥ एकेन वणिजा दृष्टो, गृहीतश्च दयालुना । अर्पितो निजभार्यायै, पालयामास सापि तम् ॥ ५ ॥ कृतोज्झिताभिधः पित्रा, लुब्ध उज्झित इत्ययम् । मनोरथेन महता, जातः पञ्चवार्षिकः ॥ ६ ॥ अहमेव पटुः प्राज्ञो, धनवान् बलवानपि । केऽमी वराका मनुजाः, मत्पुरः किङ्करा इव ॥ ७ ॥ इत्यहङ्कारपूरेण, तृणीकृतजगत्त्रयः । दिवसानतिचक्राम, स शैलस्तम्भसन्निभः ॥ ८ ॥ मातृपित्रोर्देवगुर्वो-र्न प्रणाममसौ व्यधात् । नित्यमुत्तान एवास्ते, दुर्विनीतशिरोमणिः ॥ ९ ॥ तमाह जनकोऽन्येद्यु-र्वत्स ! विद्यामठं व्रज । पठ ग्रन्थान्मुञ्च शाठ्यं, विनयं कुरु पाठके ॥ १० ॥ अलं मे गलशोषेण, प्राज्ञः प्रागप्यहं यतः । वराकः स उपाध्यायः, किं मे कर्ताऽधिकं वद ॥ ११ ॥ वणिजामयमाचारः, इत्यादि बहुचाटुभिः । प्रेषितो लेखशालायां, मातृकादि पपाठ च ॥ १२ ॥ अपराधे क्वचिच्चैष, कलाचार्येण ताडितः । तावत्तमाह रे भिक्षा-चर ! त्वं मां न वेत्सि किम् ? ॥ १२ ॥ पाठनेन तवानेन, किमित्यादि वदन्नयम् । रोषेण सहसोत्थाय, तं जघान

चपेटया ॥ १४ ॥ धृत्वा केशेषु दुष्टात्मा, तमुच्चासनसंस्थितम् । पातयामास भूमौ स, किमकृत्यं न पापिनाम् ॥ १५ ॥ ज्ञाते व्यकरे तत्र, स आहुतः क्षमाभुजा । भाषितः किमरे मूर्ख !, पण्डितः कुट्टितस्त्वया ॥ १६ ॥ सभ्रूक्षेपं साभिमानं, भूपं स प्राह दुर्मतिः । स मनाक् शिक्षितो भिक्षा-चरस्तत्किन्तु दुषणम् ॥ १७ ॥ अन्योऽपि यदि कश्चिन्मां, धिक्कर्त्ता तादृशं फलम् । स प्राप्स्यतीति सोल्लुण्ठ-मुवाच गतभीतिवत् ॥ १८ ॥ क्रुद्धेन क्ष्माभुजा धृत्वा, गलेऽसौ कर्षितः पुराद् । बाल-हत्याभिया किन्तु, वराको नहि मारितः ॥ १९ ॥ इह लोकेऽप्यहङ्कार-फलमालोक्यतां बुधाः ! । वियोगः स्वजनैर्भूपा-ऽपमानो वनवासिता ॥ २० ॥ यथा चक्री मनुष्येषु, त्रिदशेषु पुरन्दरः । तथा गुणेषु सर्वेषु, धौरेयी विनयः स्मृतः ॥ २१ ॥ अथोज्झितकुमारोऽपि, पर्यटन्विकटाटवीः ॥ तापसाश्रममायात-स्तपोधनसमाकुलम् ॥ २२ ॥ असौ पर्यस्तिकां बद्ध्वा, तेषामग्रे निविष्टवान् । ननाम न शठस्तैर-प्युक्तं मैवमुपाविश ॥ २३ ॥ ततो रुष्टः परित्यज्य, तदाश्रममविश्रमम् । अरण्यानीं भ्रमन्नेष, सिंहमेकं व्यलोकत ॥ २४ ॥ पुच्छमुच्छाल्य, सिंहोऽपि, क्ष्वेडाडम्बरभीषणः । तमभ्यधावत क्रुद्धः, सोऽपि मानी व्यचिन्तयद् । २५ ॥ आः ! क एष पशुः किं वा, नश्यतेऽस्माद्वराकतः । लोका अपि हसिष्यन्ति, मां पशोरपि बिभ्यतम् ॥ २६ ॥ इत्यहङ्कारतस्तस्मा-दनश्यंस्तेन मारितः । शास्त्रेऽपि श्रुयते ह्येवं, मणुआण अहियरो ॥ २७ ॥ स जातो गर्दभस्त-स्मात्, करभस्तुरगस्ततः । तत्रैव नगरे भूयः, पुरोहितसुतोऽभवत् ॥ २८ ॥ भूत्वापि सर्वविद्यानां, पारगः स मृतस्ततः । तत्रैव नगरे जातो, डुम्बोऽहङ्कारदोषतः ॥ २९ ॥ यथा यथा पुरोधास्तं, पश्यत्यस्य तथा तथा । स्नेहः स्याद् दुस्त्यजे येन, स्नेहवैरे पुरातने ॥ ३० ॥ अन्येद्युस्तत्पुरप्राप्तकेवलज्ञानिनोऽन्तिके । पुरोहितस्तत्स्नेहस्य हेतुं पप्रच्छ सोऽप्यवक् ॥ ३१ ॥

मूलादारभ्य तत् वृत्त-महङ्कारविपाकजम् । मानेन के न पीडयन्ते. प्राणिनः पण्डिता अपि ॥ ३२ ॥ श्रुत्वा पुरोहितस्तेन, ज्ञानिना गदितं वचः । भवाद्विरक्तः प्रव्रज्य, तदन्ते प्राप निर्वृतिम् ॥ ३२॥ उज्झितोऽपि सुगति गतवान् श्री-धर्ममार्हत-मवाप्य गुरुभ्यः । तेन मानव ! न मानविपक्षो, मान्य एष भवता भवबीजम् ॥ ३४ ॥



## मायाविजयः

अनृतस्य जननी, परशुः शीलशाखिनः । जन्म भूमिरविद्यानां, माया दुर्गतिकारणम् ॥ १ ॥

कौटिल्यपटवः पापा-मायया बकवृत्तयः । भुवनं वञ्चयमाना-वञ्चयन्ते स्वमेव हि ॥२॥

आ०—कूटषाड्गुण्ययोगेन-च्छलाद् विश्वस्तघातनात् । अर्थलोभाच्च राजानो-वञ्चयन्तेऽखिलं जनम् ॥३॥ तिल-कैर्मुद्रया मन्त्रैः, क्षामतादर्शनेन च । अन्तःशून्या बहिःसारा-वञ्चयन्ते द्विजा जनम् ॥४॥ कूटाः कूटतुलामाना-शुक्रिया-कारियोगतः । वञ्चयन्ते जनं मुग्धं, मायाभाजो वणिग्जनाः ॥५॥ जटामौण्ड्यशिखाभस्म-वल्कनाग्न्यादिधारणैः । मुग्धं श्राद्धं गर्धयन्ते, पाखण्डा हृदि नास्तिकाः ॥६॥ अरक्ताभिर्भावहाव-लीलागतिविलोकनैः । कामिनो रञ्जयन्तीभि-र्वेश्याभिर्वञ्च्यते जगत् ॥७॥ प्रतार्य कूटैः शपथैः, कृत्वा कूटकपर्दिकाम् । धनवन्तः प्रतार्यन्ते, दुरोदरपरायणैः ॥८॥ दम्पती पितरः पुत्राः, सोदर्याः सुहृदो निजाः । ईशा भृत्यास्तथान्येऽपि, माययाऽन्योन्यवञ्चकाः ॥९॥ अर्थलुब्धा गतघृणा-बन्दकारा मलिम्लुचाः । अहर्निशं जागरूका-च्छलयन्ति प्रमादिनम् ॥१०॥ कारवश्चान्त्यजाश्चैव, स्वकर्मफलजीविनः । माय-

याऽलीकशपथैः, कुर्वते साधुवञ्चनम् ॥११॥ व्यन्तरादिकुयोनिस्था, दृष्ट्वा प्रायः प्रमादिनः । क्रूराश्छलैर्बहुविधै-र्बाधन्ते मानवान् पशून् ॥१२॥ मत्स्यादयो जलचरा-श्छलात् स्वापत्यभक्षकाः । बध्यन्ते धीवरैस्तेऽपि, माययाऽऽनायपाणिभिः ॥१३॥ नानोपायैर्मृगयुभि-र्वञ्चनप्रवणैर्जडाः । निबध्यन्ते विनाश्यन्ते, प्राणिनः स्थलचारिणः ॥१४॥ नभश्चरा भूरिभेदा-श्चरका लावकादयः । बध्यन्ते माययाऽत्युग्रैः, स्वल्पकग्रासगृध्नुभिः ॥१५॥ तदेवं सर्वलोकेऽपि, परवञ्चकतापराः । स्वस्य धर्मं सद्गतिं च, नाशयन्तः स्ववञ्चकाः ॥१६॥ तिर्यग्जातेः परं बीज-मपवर्गपुरार्गला । विश्वासद्रुमदावाग्नि-र्माया हेया मनीषिभिः ॥१७॥ मल्लिनाथः पूर्वभवे, कृत्वा मायां तनीयसीम् । मायाशल्यमनुत्खाय, स्त्रीत्वं प्राप जगत्पतिः ॥१८॥

तदार्जवमहौषध्या, जगदानन्दहेतुना । जयेज्जगद्द्रोहकरीं, मायां विषधरीमिव ॥१९॥

आ०—आर्जवं सरलः पन्था-मुक्तिपुर्याः प्रकीर्तितः । आचारविस्तरः शेषो-बाह्या अपि यदूचिरे ॥ २० ॥ सर्वं जिह्मं मृत्युपद-मार्जवं ब्रह्मणः पदम् । एतावञ्ज्ञानविषयः, प्रलापः किं करिष्यति ? ॥२१॥ इति ॥ भवेयुरार्जवजुषो-लोकेऽपि प्रीतिकारणम् । कुटिलादुद्विजन्ते हि, जन्तवः पन्नगादिव ॥२२॥ अजिह्मचित्तवृत्तीनां, भववासस्पृशामपि । अकृत्रिमं मुक्तिसुखं, स्वसंवेद्यं महात्मनाम् ॥२३॥ कौटिल्यशङ्कुना क्लिष्ट-मनसां वञ्चकात्मनाम् । परव्यापादनिष्ठानां, स्वप्नेऽपि स्यात् कुतः सुखम् ॥२४॥ समग्रविद्यावैदुष्ये-ऽधिगतासु कलासु च । धन्यानामुपजायेत, बालकानामिवार्जवम् ॥२५॥ अज्ञानामपि बालाना-मार्जवं प्रीतिहेतवे । किं पुनः सर्वशास्त्रार्थ-परिनिष्ठितचेतसाम् ? ॥२६॥ स्वाभाविकी हि ऋजुता, कृत्रिमा कुटिलात्मता । ततः स्वाभाविकं धर्मं, हित्वा कः कृत्रिमं श्रयेद् ? ॥२७॥ छलपैशुन्यवक्रोक्तिवञ्चनाप्रवणे जने । धन्याः

केचिद् निर्विकाराः, सुवर्णप्रतिमा इव ॥२८॥ श्रुताब्धिपारमाप्तोऽपि, गौतमो गणभृद्वरः । अहो ! शैक्ष इवाश्रौषी-दार्जवाद् भगवद्गिरः ॥२९॥ अशेषमपि दुष्कर्म, ऋज्वालोचनया क्षिपेत् । कुटिलालोचनां कुर्व-न्नल्पीयोऽपि विवर्धयेत् ॥ ३० ॥ काये वचसि चित्ते च, समन्तात् कुटिलात्मनाम् । न मोक्षः किन्तु मोक्षः स्यात्, सर्वत्राकुटिलात्मनाम् ॥३१॥ इति निगदितमुग्रं कर्मकौटिल्यभाजा-मृजुपरिणतिभाजां चानवद्यं चरित्रम् । तदुभयमपि बुद्धया संस्पृशन् मुक्तिकामो, निरुपममृजुभावं संश्रयेच्छुद्धबुद्धिः ॥ ३२ ॥

मायापिशाचीविवशा नरा ये, स्वार्थैकनिष्ठाः परवञ्चनानि ।
सृजन्ति तेऽधोगतयो भवन्ति, निदर्शनं त्वत्र स पापबुद्धिः ॥ १ ॥

पुरे श्रीतिलके द्रव्यो-पार्ज्जनैकपरायणौ । धर्म्मबुद्धिः पापबुद्धि-रभूतां वणिजावुभौ ॥ १ ॥ ऋजुस्वभावस्तत्राद्यः, सर्वेषां हितचिन्तकः । द्वितीयः कपटी मायी, विश्वस्तस्याऽपि वञ्चकः ॥ २ ॥ तयोरप्यभवन्मैत्री, वाणिज्यं तन्वतोर्मिथः । लोको वदत्ययं योगः, काष्ठक्रकचसन्निभः ॥ ३ ॥ तथापि धर्म्मबुद्धिस्तं, न त्यजत्युत्तमत्वतः । अशोभाकृदपि त्याज्यः, कलङ्कः शशिना किमु ॥ ४ ॥ अन्यदा व्यवसायार्थं, तौ गतौ क्वापि पत्तने । वणिजां क्षीणवित्तानां, व्यवसायो हि कामधुक् ॥ ५ ॥ पृथक्पृथगुपार्ज्यैतौ, दीनाराणां सहस्रकम् । प्राग्वद्वक्रेतरस्वान्तौ, वलितौ स्वपुरं प्रति ॥ ६ ॥ आसन्ने स्वपुरे प्राप्ते, शठोऽशठमभाषत । एतावदखिलं वित्तं, पुरान्तर्गृह्यते कुतः ॥ ७ ॥ कियन्निधीयतेऽत्रैवा-ऽवसरे लास्यते पुनः । राजदायाददस्युभ्यो, भयं वित्तस्य नैकधा ॥ ८ ॥ श्रुत्वेति सरलस्वान्तो, वित्तं पञ्चशतीमितम् । न्यास्थत्तत्रैव तच्चेतः-प्रत्ययाय

पराऽपि च ॥ ९ ॥ आगतौ स्वगृहे वर्द्धा-पनकं च तयोरभूत। कियद्दिनान्तरे वित्तं, तद्भूस्थं पापधीरलात् ॥ १० ॥ अथावसरमासाद्य, पापबुद्धिस्तमब्रवीत्। आगच्छ मित्र ! तद्वित्तं, यथा सम्प्रति गृह्यते ॥ ११ ॥ स्थानद्वयं तदालोक्य, रिक्तं प्राह स पापधीः। आः केनापि हृतं वित्त-मावयोर्जीवितोपमम् ॥ १२ ॥ तं धिगस्तु स पापात्मा, म्रियतां किं करिष्यते। त्रिलापान्कृत्रिमानेवं, स सत्यानिव निर्ममे ॥ १३ ॥ अथाऽब्रवीत् स पापात्मा, धार्म्मिकं धर्म्मबुद्धिकम्। रे धर्म्मधूर्त्त ! रे दुष्ट !, तवैवैतद्विजृम्भितम् ॥ १४ ॥ धर्म्मबुद्धिरपि प्राह, भ्रातः ! किमिदमुच्यते। नेदृशं मादृशं कर्म्म, किन्तु कस्यापि पापिनः ॥ १५ ॥ जातो विवाद उभयो-र्गतौ राजकुले च तौ। पापबुद्धिस्तदा प्राह, चौरोऽयं धर्म्मबुद्धिकः ॥१६॥ प्राहुर्नियोगिनः साक्षी, युवयोः कोऽपि विद्यते। पापबुद्धिरभाषिष्ट, साक्षिणो वननाकिनः ॥ १७ ॥ शुद्धबुद्धिर्धर्म्मबुद्धि-स्तदा चेतस्यचिन्तयत्। अहो ! धृष्टत्वमेतस्य, अहो कपटपाटवम् ॥१८॥ मम श्रीधर्म्म एवात्र, सखाऽन्यैः किं सहायकैः। प्रातः परीक्षा कर्त्तव्ये-त्यादि भूपादयोऽब्रुवन् ।। १९ ॥ पापबुद्धिस्ततः प्राह, रात्रौ स्वजनकं प्रति। प्रारब्धोऽयं मया कूट-कलहो निखिलोऽपि हि ॥२०॥ कथं कर्त्तास्मि तातेने-त्युक्तः स प्राह दुष्टधीः। त्वं तात ! विपिने गत्वा, प्रविश क्वापि कोटरे ॥२१॥ राजादीनां पृच्छतां च, त्वया वाच्यमिति मगे। निष्कलङ्कः पापबुद्धि-र्धर्म्मबुद्धिस्तु तस्करः ॥ २२ ॥ तेनेतिशिक्षितस्तात-स्तथैव निखिलं व्यधात्। प्रत्यूषे मिलिते लोके, स ऊचे च तथैव तत् ॥ २३ ॥ इतस्ततो विलोकन्ते, न च पश्यन्ति कञ्चन। लोकाः सर्वेऽपि साश्चर्या-स्तूर्णमुत्कर्णतां दधुः ॥ २४ ॥ सहसात्पन्नबुद्धिस्तु, धर्म्मबुद्धिस्तदाऽवदत्। राजानं प्रति देवेदं, कोटरं ज्वालयिष्यते ॥ २५ ॥ देवो वा मानवो वापि, यथा प्रत्यक्षतां व्रजेत्। इत्युक्त्वा सहसोत्थाय, यावत्तज्ज्वा-

लयत्यसौ ॥ २६ ॥ तावत्स जनकस्तस्मा-त्कोटरान्निर्गतः क्षणात्। कर्म्मणा प्रेरितो जीवो, जनन्या उदारादिव ॥ २७ ॥ तदानीं तं नृपोऽपृच्छद्रे! किमिदमद्भुतम्। सोऽपि वृत्तान्तमाचख्यौ, दुःसुतप्रेरणादिकम् ॥ २८ ॥ तं तत्सुतं च ते लोकाः, धिक्कुर्व्वन्तीति रे! युवाम्। अकुशाथामिदं किं य-न्मित्रेऽपि द्रोहकारिता ॥ २९ ॥ पापबुद्धिस्ततो राज्ञा, मार्यमाणोऽपि वारितः। लगित्वा पादयोर्धर्म्म-बुद्धिना शुद्धबुद्धिना ॥ ३० ॥ धर्म्मबुद्धेस्तदा श्लाघां, निन्दां पापमतेस्तथा। भूपाद्याश्चक्रिरे माया, कटरेऽत्रैव दुःखदा ॥ ३१ ॥ एवं बभूवाऽशठवक्रभावयुग्, तन्मित्रयुग्मं सुखदुःखभाजनम्। मायां भुजङ्गीमिव दूरतस्ततो-ऽवदातचित्तास्त्यजत द्रुत जनाः! ॥ ३२ ॥

## लोभविजयः

आकरः सर्वदोषाणां, गुणग्रसनराक्षसः। कन्दो व्यसनवल्लीनां, लोभः सर्वार्थबाधकः ॥ १ ॥
धनहीनः शतमेकं, सहस्रं शतवानपि। सहस्राधिपतिर्लक्षं, कोटिं लक्षेश्वरोऽपि च ॥ २ ॥
कोटीश्वरो नरेन्द्रत्वं, नरेन्द्रश्चक्रवर्तिताम्। चक्रवर्ती च देवत्वं, देवोऽपीन्द्रत्वमिच्छति ॥ ३ ॥
इन्द्रत्वेऽपि हि संप्राप्ते, यदिच्छा न निवर्तते। मूले लघीयांस्तल्लोभः सराव इव वर्धते ॥ ४ ॥

आ०—हिंसेव सर्वपापानां, मिथ्यात्वमिव कर्मणाम्। राजयक्ष्मेव रोगाणां, लोभः सर्वागसां गुरुः ॥५॥ अहो लोभस्य साम्राज्यमेकछत्रं महीतले। तरवोऽपि निधिं प्राप्य, पादैः प्रच्छादयन्ति यत् ॥६॥ अपि द्रविणलोभेन, ते द्वित्रि-

चतुरिन्द्रियाः । स्वकीयान्यधितिष्ठन्ति, प्राग्निधानि मूर्च्छया ॥७॥ भुजङ्गगृहगोधा–मुख्याः पंचेन्द्रिया अपि । धनलोभेन लीयन्ते, निधानस्थानभूमिषु ॥८॥ पिशाचमुद्गलप्रेत–भूतयक्षादयो धनम् । स्वकीयं परकीयं वाऽ–प्यधितिष्ठन्ति लोभतः ॥९॥ भूषणोद्यानवाप्याद्रौ, मूर्च्छितास्त्रिदशा अपि । च्युत्वा तत्रैव जायन्ते, पृथ्वीकायादियोनिषु ॥१०॥ प्राप्योपशान्तमोत्वं, क्रोधादिविजये सति । लोभांशमात्रदोषेण, पतन्ति यतयोऽपि हि ॥११॥ एकामिषाभिलाषेण, सारमेया इव द्रुतम् । सोदर्या अपि युध्यन्ते, धनलेशजिघृक्षया ॥१२॥ लोभाद् ग्रामाद्रिसीमान–मुद्दिश्य गतसौहृदाः । ग्राम्या नियुक्ता राजानो–वैरायन्ते परस्परम् ॥१३॥ हासशोकद्वेषहर्षा–नसतोऽप्यात्मनि स्फुटम् । स्वामिनोऽग्रे लोभवन्तो नाटयन्ति नटा इव ॥१४॥ आरभ्यते पूरयितुं, लोभगर्तो यथा यथा । तथा तथा महच्चित्रं, मुहुरेष विवर्धते ॥१५॥ अपि नामैष पूर्येत, पयोभिः पयसां पतिः । न तु त्रैलोक्यराज्येऽपि, प्राप्ते लोभः प्रपूर्यते ॥१६॥ अनन्ता भोजनाच्छाद–विषयद्रव्यसञ्चयाः । भुक्तास्तथापि लोभस्य, नांशोऽपि परिपूर्यते ॥१७॥ लोभस्त्यक्तो यदि तदा, तपोभिरफलैरलम् । लोभस्त्यक्तो न चेत् तर्हि, तपोभिरफलैरलम् ॥१८॥ मथित्वा शास्त्रसर्वस्वं, मयैतदवधारितम् । लोभस्यकस्य हानाय, प्रयतेत महामतिः ॥१९॥

लोभसागरमुद्वेल–मतिवेलं महामतिः । संतोषसेतुबन्धेन, प्रसरन्तं निवारयेत् ॥ २० ॥

आ०—यथा नृणां चक्रवर्ती, सुराणां पाकशासनः । तथा गुणानां सर्वेषां, सन्तोषः प्रवरो गुणः ॥२१॥ सन्तोषयुक्तस्य यते–रसंतुष्टस्य चक्रिणः । तुलया संमितो मन्ये, प्रकर्षः सुखदुःखयोः ॥२२॥ स्वाधीनं राज्यमुत्सृज्य, संतोषाऽमृततृष्णया । निस्सङ्गत्वं प्रपद्यन्ते, तत्क्षणाच्चक्रवर्तिनः ॥२३॥ निवृत्तायां धनेच्छायां, पार्श्वस्था एव संपदः । अङ्गुल्या पिहिते

कर्णे, शद्वाद्वैतं विजृम्भते ॥२४॥ संन्तोषसिद्धौ संसिद्धाः, प्रतिवस्तु विरक्तयः । अक्ष्णोः पिधाने पिहितं, ननु विश्वं चराचरम् ॥२५॥ किमिन्द्रियाणां दमनैः, किं कायपरिपीडनैः ? । ननु संतोषमात्रेण, मुक्तिश्रीमुखमीक्ष्यते ॥२६॥ जीवन्तोऽपि विमुक्तास्ते, ये मुक्तिसुखशालिनः । किं वा विमुक्तेः शिरसि, शृङ्गं किमपि वर्तते ? ॥२७॥ कि रागद्वेषसंकीर्णं, किं वा विषयसंभवम् । येन संतोषज सौख्यं, हीयेत शिवसौख्यतः ? ॥२८॥ परप्रत्यायनासारैः, किं वा शास्त्रसुभाषितैः ? । मीलिताक्षा विमृशन्तु, संतोषाऽऽस्वादजं सुखम् ॥२९॥ चेद् कारणानुकारीणि, कार्याणि प्रतिपद्यसे । संतोषानन्दजन्मा तन्-मोक्षानन्दः प्रतीयताम् ॥३०॥ ननु तीव्रं तपःकर्म, कर्मनिर्मूलनं जगुः । सत्यं तदपि संतोष-रहितं विफलं विदुः ॥३१॥ कृषिसेवा पाशुपाल्यवाणिज्यैः किं सुखार्थिनाम् । ननु संतोषपानात् किं, नात्मा निर्वृतिमाप्यते ? ॥३२॥ यत् संतोषवतां सौख्यं, तृणसंस्तरशायिनाम् । क्व तत् संतोषवन्ध्यानां तूलिकाशायिनामपि ॥३३॥ असंतुष्टास्तृणायन्ते, धनिनोऽपीशिनां पुरः । ईशिनोऽपि तृणायन्ते, संतुष्टानां पुरः स्थिताः ॥३४॥ आयासमात्रं नश्वर्य-श्चक्रिशक्रादिसंपदः । अनायासं च नित्यं च, सुखं संतोषसंभवम् ॥३५॥ इति प्रत्यादेष्टुं निखिलमपि लोभस्य ललितं, मयोक्तः संतोषः परमसुखसाम्राज्यसुभगः । कुरुध्वं लोभाग्निप्रसरपरितापं शमयितुं, तदस्मिन् संतोषाऽमृतरसमये वेश्मनि रतिम् ॥३६॥

## लोभोपरि सागरश्रेष्ठि कथा

यो द्वादशं यावदुपागतो गुण-स्थानं निषेधं स्थिरसंविदः सृजेत ।

इहाप्यमुत्रापि विडम्बयेन्न कं, स लोभवैरी किल सागरं यथा ॥ १ ॥

सागरः सादरो द्रव्यो-पार्जने धर्मवर्जितः । अभूल्लक्ष्मीमन्दिरे श्रेष्ठी, द्रव्यकोट्याष्टकप्रभुः ॥ १ ॥ परं कदर्यमूर्द्धन्यो, न भुङ्क्ते न ददाति च । कपाटपिहितं प्रायो, द्वारं तस्य सदा भवेत् ॥ २ ॥ गृह एव स्थितस्यास्य, दृष्टौ कोऽपि करोति न । भोजनस्नानदानादि, याचकः कोऽपि नैति च ॥ ३ ॥ कमला गृहीणी तस्य, देविलस्तनयस्तयोः । विमला तत्प्रिया सर्वे -ऽप्येते तच्चकिताः सदा ॥ ४ ॥ तत्र श्वश्रू-वधू द्वौ ते, मंत्रतंत्रविशारदे । अनेकाभिः कुविद्याभिः, स्वैराचारे बभूवतुः ॥५॥ योगिन्येकाऽन्यदा तस्य. विजने गृहमागता । श्वश्रूवधूभ्यां सा पृष्टा, सादरं नतिपूर्वकम् ॥६॥ स्वामिन्यत्र गृहे दत्त-द्वारे त्वं कथमागता । साप्याह मम विद्यास्ति, साधारा व्योमगामिनी ॥ ७ ॥ ताभ्यां तस्याश्च सा विद्या, गृहीता बहुमानतः । एकं च शुषिरं दारुं, विद्यते तद्गृहे महत् ॥८॥ तस्मिन्नारुह्य तद्दत्त-मन्त्रशक्त्या च ते उभे । निशीथसमये यातः, क्रीडार्थं स्वेप्सितेपदे ॥ ९ ॥ एकदा कायचिन्तार्थं, निशीथे पुत्र उत्थितः । सुप्ताशेषजनेऽद्राक्षी-त्कौतुकं रहसि स्थितः ॥ १० ॥ श्वश्रूवध्वौ तदोत्थाय, सौत्सुक्यं निभृतक्रमम् । त्वर्यतां त्वर्यतामेव-मूचतुश्च मिथो मुदा ॥ ११ ॥ सोऽप्यभूद्यावदुत्कर्णः, श्वश्रूस्तावदुवाच ताम् । अरे ! काष्ठमिदं शीघ्रं, सज्जीकुरु पुरो भव ॥१२॥ आत्मनामस्ति गन्तव्यं, दूरे तन्मा विलम्बय । इत्युक्त्वा ते उभे तत्रा-रूढे तन्मन्त्रपूर्वकम् ॥ १३ ॥ तत उत्पतिते व्योम्नि, व्यन्तर्याविव ते उभे । इत्याश्चर्यं तदालोक्य-ऽचिन्तयद्देवलस्तदा ॥ १४ ॥ अहो ! किमेते शाकिन्यौ, पापिन्यौ पतिवञ्चिके । गते कुत्र कदा पश्चा-देते चात्रागमिष्यतः ॥१५॥ इत्यसौ जाग्रदेवास्थात्, तत्र ते यावदागते । ततः क्षणान्तरे जातः, प्रातःकालो विकस्वरः ॥१६॥ स तयोस्तादृशं

वृत्तं, न कस्यापि न्यवेदयत् । परेषां दूषणानीव, प्रायश्चित्तप्रदो गुरुः ॥१७॥ स कौतुकी द्वितीये तु, दिने जाते तमोभरे । प्रागेव शुषिरे तत्र, प्रौढे काष्ठे प्रविष्टवान् ॥ १८ ॥ तथैवारुह्य ते तत्र, जग्मतुः स्वेप्सितं पदम् । प्रवृत्ते क्रीडितुं मुक्त्वा, तत्काष्ठं क्वापि भूतले ॥ १९ ॥ अन्या अपि स्त्रियः सन्ति, मिलितास्तत्र भूरिशः । चिरं क्रीडारसस्ताभिः-श्चक्र तत्राऽविशङ्कितम् ॥ २० ॥ तत्कोटराद्विनिर्गत्य, कुमारोऽपि भ्रमन् क्वचित् । स्वर्ण्णेष्टिकाभिराकीर्ण-मिष्टिकापाकमैक्षत ॥ २१ ॥ उत्फुल्लनयनश्चेत-स्यचिन्तयदयं तदा । स्वर्णद्वीपो ह्ययं नूनं, श्रूयते यो जनोक्तिभिः ॥ २२ ॥ यः प्राप्य क्लेशकोटीभि-र्निःस्वैः स्वप्नेऽपि नेक्ष्यते । अयत्नेनापि सम्प्राप्तो, मया भाग्यं महन्मम ॥ २३ ॥ द्वित्राः स इष्टिकाः साराः, संतोषी जगृहे ततः । मनस्वी नहि लोभी स्यात्, सति लाभेऽपि भूयसि ॥ २४ ॥ तथैव कोटरे तत्र, स संलीनवपुः स्थितः । स्वाङ्गोपाङ्गानि सङ्कोच्य, प्रावृषीव महामुनिः ॥ २५ ॥ क्रीडित्वा सुचिरं ते अ-प्यागते तत्र निर्भये । तथैवोत्पतिते व्योम्नि, क्रमाच्च गृहमागते ॥ २६ ॥ प्रातःकाले कुमारस्त-द्वृत्तज्ञापनपूर्वकम् । स्वपित्रेऽदर्शयत्स्वर्ण्णं, विस्मितः सोऽपि तं जगौ ॥ २७ ॥ अरे मूर्ख ! त्वया स्तोक-मिदमात्तं कथं हहा ! यत्नं विनापि हस्ताप्तं, धनं को नाम मुञ्चति ॥२८॥ अद्याहं तत्र यास्यामि, तल्लास्यामि यथेप्सितम् । दारिद्र्यं द्रावयिष्यामि, निश्चिन्ता हि भवादृशाः ॥२९॥ इत्युक्त्वोत्थितवान् श्रेष्ठी, लोभक्षोभवशंवदः । तद्ध्यानलीनस्तदह-न्यभूत्तन्दुलमत्स्यवत् ॥ ३० ॥ निशीथिन्यां तथैवैष, तत्काष्ठान्तः प्रविष्टवान्, प्रास्थितः सह ताभ्यां च, तं प्रदेशमुपागमत् ॥३१॥ ततो निर्गत्य पुत्रोक्ता-भिज्ञानादि स्मरन् हृदि । इष्टकापाकमद्राक्षीत्, प्रत्यक्षमिव रैगिरिम् ॥ ३२ ॥ हृष्टस्तद्दर्शनाच्छ्रेष्ठी, ह्यसन्तुष्टः स इष्टिकाः । गृहीत्वा तत्तथा बभ्रे, कष्टेनामात्स्वयं यथा

॥ ३३ ॥ तथैव श्वश्रूवध्वौ ते, चलिते स्वपुरीमभि । उदन्वदुपरि प्राप्ते, यावत्तावद्धधूरवक् ॥ ३४ ॥ केनापि हेतुना मातः!, काष्ठमद्य महाभरम् । न चलत्यग्रतः शीघ्रं, श्वश्रूरप्याह तां प्रति ॥३५॥ अरे ! त्यजैतदत्रैव, यच्चैतत् प्रेक्ष्यतेतरत् । गृहाण काष्ठं तद्यावो, यथा शीघ्रं पुरे निजे ॥ ३६ ॥ अथ भीतोऽवदच्छ्रेष्ठी, मा मां क्षिपतमम्बुधौ । उपलक्ष्य तमन्याऽन्यं, ते ब्रूतस्त्वं क्व रे इह ? ॥ ३७ ॥ सुतरां कूपिते तस्मा-द्विगोपनभयादिमे । सकाष्ठं तं परित्यज्य, तत्र ते गृहमागते ॥ ३८ ॥

अन्यत्राप्युक्तम्—

अतिलोभो न कर्त्तव्यो, लोभं नैव परित्यजेत् । अतिलोभाभिभूतात्मा, सागरः सागरेऽपतत् ॥ १ ॥

क्रमेण ज्ञातवृत्तान्तो, भीतस्ताभ्यां सुतोऽपि सः । परिव्रज्यामुपादाय, जातः सुखनिकेतनम् ॥ ३९ ॥ लोभस्याप्येवमाकर्ण्य, विपाकं विबुधा जनाः । संतोषामृतपूरेणाऽऽत्मानं सिञ्चत सर्वदा ॥ ४० ॥

## इन्द्रियविजयः

सः कषायजयः इन्द्रियजयेन स्यात् अतः इन्द्रियजयमाह—

विनेन्द्रियजयं नैव कषायाञ्जेतुमीश्वरः । हन्यते हैमनं जाड्यं न विना ज्वलितानलम् ॥ १ ॥
अदान्तैरिन्द्रियहयै-श्चलैरपथगामिभिः । आकृष्य नरकारण्ये, जन्तुः सपदि नीयते ॥ २ ॥
इन्द्रियैर्विजितो जन्तुः, कषायैरभिभूयते । वीरैः कृष्टेष्टकः पूर्वं, वप्रः कैः कैर्न खण्ड्यते ? ॥ ३ ॥

कुलघाताय पाताय, बन्धाय च वधाय च। अनिर्जितानि जायन्ते, करणानि शरीरिणाम् ॥ ४ ॥

आ०—इन्द्रियैः स्वार्थविवशैः, कस्को नैव विडम्ब्यते। अपि विज्ञातशास्त्रार्था-श्चेष्टन्ते बालका ईव॥ ५ ॥ किमतोऽपि घृणास्थानमिन्द्रियाणां प्रकाश्यते। यद् बन्धौ बाहुबलिनि, भरतोऽप्यस्त्रमक्षिपत् ॥६॥ जयो यद् बाहुबलिनि, भरते च पराजयः। जिताजितानां यत्सर्व-मिन्द्रियाणां विजृम्भितम् ॥ ७॥ यच्छस्त्राशस्त्रि युध्यन्ते, चरमेऽपि भवे स्थिताः। दुरन्तानामिन्द्रियाणां, महिम्नाऽनेन लज्जिताः ॥ ८ ॥ दण्डयन्तां चण्डचरितै-रिन्द्रियैः पशवो जनाः। शान्तमोहाः पूर्वविदो, दण्डयन्ते यत् तदद्भुतम् ॥ ९ । जिता हृषीकैरत्यन्तं, देवदानवमानवाः। जुगुप्सितानि कर्माणि, ही! तन्वन्ति तपस्विनः ॥१०॥ अखाद्यान्यपि खादन्त्य पेयान्यपि पिबन्ति च। अगम्यान्यपि गच्छन्ति, हृषीकवशगा नराः ॥११॥ वेश्यानां नीचकर्माणि, दास्यान्यपि च कुर्वते। कुलशीलोज्झितास्त्यक्त-करुणैः करणैर्हताः ॥१२॥ परद्रव्ये परस्त्रीषु, मोहान्धमनसां नृणाम्। या प्रवृत्तिः सेन्द्रियाणा-मतन्त्राणां विजृम्भितम् ॥१३॥ पाणिपादेन्द्रियच्छेद मरणानि शरीरिभिः। प्राप्यन्ते यद्वशात् तेभ्यः, करणेभ्यो नमोनमः ॥१४। विनयं ग्राहयन्त्यन्यान्, ये स्वयं करणैर्जिताः। पिधाय पाणिना वक्त्रं, तान् हसन्ति विवेकिनः ॥१५॥ आविरिञ्चादा च कीटाद्, ये केचिदिह जन्तवः। विमुच्यैकं वीतरागं, ते सर्वेऽपीन्द्रियैर्जिताः ॥१६॥

वशास्पर्शसुखास्वाद-प्रसारितकरः करी। आलानबन्धनक्लेश-मासादयति तत्क्षणात् ॥ १७ ॥

पयस्यगाधे विचरन, गिलन् गलगतामिषम्। मैनिकस्य करे दीनो-मीनः पतति निश्चितम् ॥ १८ ॥

निपतन् मत्तमातङ्ग-कपोले गंधलोलुपः। कर्णतालतलाघाताद्, मृत्युमाप्नोति षट्पदः ॥ १९ ॥

कनकच्छेदसंकाश-शिखाऽऽलोकविमोहितः । रभसेन पतन् दीपे, शलभो लभते मृतिम् ॥ २० ॥
हरिणो हारिणीं गीति-माकर्णयितुमुद्धुरः । आकर्णाकृष्टचापस्य, याति व्याधस्य वेध्यताम् ॥ २१ ॥
एवं विषय एकैकः, पञ्चत्वाय निषेवितः । कथं हि युगपत् पञ्च, पञ्चत्वाय भवन्ति न? ॥ २२ ॥
तदिन्द्रियजयं कुर्याद्, मनःशुद्धया महामतिः । यां विना यमनियमैः, कायक्लेशो वृथा नृणाम् ॥ २३ ॥

आ०—अनिर्जितेन्द्रियग्रामो, यतो दुःखैः प्रबाध्यते । तस्माज्जयेदिन्द्रियाणि, सर्वदुःखविमुक्तये ॥२४॥ न चेन्द्रियाणां
विजयः, सर्वथैवाप्रवर्त्तनम । रागद्वेषविमुक्तया तु, प्रवृत्तिरपि तज्जयः ॥२५॥ अशक्यो विषयोऽस्प्रष्टु-मिन्द्रियैः स्वसमीपगः।
रागद्वेषौ पुनस्तत्र, मतिमान् परिवर्जयेत् ॥ २६ ॥ हताहतानीन्द्रियाणि, सदा संयमयोगिनाम् । अहतानि हितार्थेषु,
हतान्यहितवस्तुषु ॥२७॥ जितान्यक्षाणि मोक्षाय, संसारायाऽजितानि तु । तदेतदन्तरं ज्ञात्वा, यद् युक्तं तत् समाचर ॥२८॥
स्पर्शे मृदौ च तूल्यादे-रुपलादेश्च कर्कशे । भव रत्यरती हित्वा, जेता स्पर्शनमिद्रियम् ॥२९॥ रसे स्वादौ च भक्ष्यादे-रितर-
स्मिन्नथापि वा। प्रीत्यप्रीती विमुच्योच्च-र्जिह्वेन्द्रियजयी भव ॥३०॥ घ्राणदेशमनुप्राप्ते, शुभे गन्धेऽपरत्र वा। ज्ञात्वा वस्तु-
परिणामं, घ्राणेन्द्रियजयं कुरु ॥३१॥ मनोज्ञं रूपमालोक्य, यदि वा तद्विलक्षणम् । त्यजन् हर्षं जुगुप्सां च, जय त्वं चक्षुरिन्द्रियम्
॥३२॥ स्वरे श्रव्ये च वीणादेः, खरोष्ट्रादेश्च दुःश्रवे । रतिं जुगुप्सां च जयन्, श्रोत्रेन्द्रियजयी भव ॥ ३३ ॥ कोऽपि
नास्तीह विषयो, मनोज्ञ इतरोऽपि वा । इन्द्रियैर्नोपभुक्त-स्ततस्वास्थ्यं किं न सेव्यते ? ॥३४॥ शुभा अप्यशुभायन्ते, शुभा-
यन्तेऽशुभा अपि । विषयास्तत् क्व रज्येत विरज्येत क्व चेन्द्रियैः ॥३५॥ स एव रुच्यो द्वेष्यो वा, विषयो यदि हेतुतः ।

शुभाशुभत्वं भावानां, तत्र तत्त्वेन जातुचित् ॥३६॥ एवं विमृश्य विषयेषु शुभाशुभत्व-मौपाधिकं तदविमुक्तिविरक्तचेताः। हन्तेन्द्रियार्थमधिकृत्य जहीति रागं, द्वेषं तथेन्द्रियजयाय कृताभिलाषः॥ ३७॥



## । इन्द्रियजयोपरि सुभानुकथा ।

अत्रार्थे सुभानुसंबन्धश्चायम्—

भरतक्षेत्रे मगधदेशे सुवप्रापुरीशोऽरिदमनभूपः, धारिणी भार्या, तयोः पुत्रः सुभानुः कुमारः सुखक्रीडासुरो यौवनं प्राप। जनकेन रूपलावण्यःकलावत्य एकशतकन्याः परिणायिताः। ताभिः सह विषयान् भुञ्जमानो भानुकुमारः सुखेन दिनान्निर्वाहयति। एकदा श्रीसंभवजिनागमनं वनपालमुखादशृणोत्। तथाहि सूत्रम्—"अणेगेहिं केवलिहिं अणेगेहिं विउलमईहिं अणेगेहिं देवदेवीहिं संपरिवुडो सिरिसंभवो अरिहा सव्वन्नू सव्वदंसी आगासगएणं चक्केणं" इत्यादि वर्ण्यम्। तदा शतस्त्रीपरिवृतः कुमारो महद्धर्या श्रीसेनाङ्गजं समवसरणस्थं प्रणम्य विनयेन तस्थौ। श्रीजिनेन धर्म उपदिष्टः—"सर्व-धर्मेषु मुख्यहेतुः परभावग्रहणत्याग एव ज्ञेयः। तत्र स्वद्रव्य-स्वक्षेत्र-स्वकाल-स्वभावत्वेन स्यादस्तीति प्रथमभङ्गगृहीतात्मपरिणामः स्वात्मनि वर्तमानः स्वधर्मः, तस्य समवायत्वेनाभेदात् न त्यागः, अनादिमिथ्यादृष्टित्वकुदेवादिरक्तत्वाद्यप्रशस्तवस्तुग्रहणस्य त्यागो मतः। तत्र नामतः त्यागः शब्दालापरूपः, स्थापनात्यागो दशदयतिधर्मपूजनादौ स्थाप्यमानः, द्रव्यत्यागो बाह्यवृत्त्ये-न्द्रियाभिलाषाहारोपधिप्रमुखाणां त्यागः, भावतोऽभ्यन्तररागद्वेषमिथ्यात्वाद्याश्रवपरिणतित्यागः, नामस्थापनां यावत्

नैगमसंग्रहो, व्यवहारो विषगरलानुष्ठानेन, ऋजुसूत्रेण (त्रः) कटुविपाक भीत्या, शब्दसमभिरूढौ तद्धेतुतया, एवंभूतस्त्यागः सर्वथा वर्जनं वर्जना यत्नेन"। इत्याद्यनेकयुक्तिगर्भितमुपदेशं श्रुत्वा भानुकुमारस्तीर्थंकरचरणावभिवन्द्य चारित्रमोहक्षयोपशमेन जातविरतिमतिर्भणति स्म—"हे नाथ! अशरणशरण! महासार्थवाह! भवसमुद्रनिर्यामक! मम सर्वविरतिसामायिकमुपदिश, येन विषयकषायत्यागो वर्धते"। एवं निशम्यार्हता सामायिकचारित्रं दत्तम्। गृहीतव्रतः श्रमणो जातः। स कुमारो मृतः। तत्र तज्जनकः सपरिकर आगतः सुतं मृतं वीक्ष्य विषण्णोऽभूत्। जननी विलापं वितन्वती क्रन्दन्ती रुदनं चकार। तदा झटित्येव देवत्वं लब्ध्वा समागात् सो जिनाभ्यर्णे। तौ पितरौ विलपन्तौ दृष्ट्वा भणति–"किमेतादृशं दुःखम्? यज्जिनचरणौ परमसुखदायकौ लब्ध्वा रुदनं कुरुथः?"। तावूचतुः—"अस्मत्सुतः परमवल्लभो विपन्नः, तस्य वियोगो जातः, तद्दुःखं दुःसहम्"। सुरः प्राह—"हे नृप! शृणु, तस्य शरीरं तवेष्टं तदैतत्तत्पतितकलेवरे रागं कुरु। हे मातः! त्वं कथं पुनर्विलपसि? तव पुत्रः क्व कस्मिन् स्थले शरीरे वा जीवे वा? द्वावपि तव पुरो वर्तेते, न युक्तं रोदनम्"। ततो जनकोऽवदत्—"नोऽत्र रागोऽस्माकं प्रसरति"। सुरोऽवदत्–"तर्हि स्वार्थं एव सर्वेष्विष्टः, परं परमार्थस्तु न, तदा सर्वमनित्यमेव, व्यलीकमेव संबन्धव्यूहमवस्तु, युवां कथं मुह्यथः? सर्वो लौकिक संबन्धो भ्रमरूप एव। यतः—

युष्माकं सङ्गमोऽनादिर्बन्धवोऽनियतात्मनाम्। ध्रुवैकरूपान् शीलादिबन्धूंन्नित्यं समाश्रये॥ १॥

हे बन्धवः! युष्माकं सबन्धोऽनादिरसंयतात्मनां भवति। अधुना ध्रुवैकरूपान् शीलादिबन्धून् शीलशमदमादिबन्धून् हितकारकान् नित्यं सदा समाश्रये (अहम्)।

कान्ता मे समतैवैका, ज्ञातयो मे समक्रियाः । बाह्यवर्गमिति त्यक्त्वा, धर्मसंन्यासवान् भवेत् ॥ २ ॥

औदयिकसंपदं विहाय क्षयोपशमजां स्वीयां साधनसंपदं प्राप्नोति, तदनु क्षायिकाभेदरत्नत्रयीरूपां प्राप्नोति" ।



इत्यादिना प्रबुद्धं सर्वकुटुम्बं श्रीमत्संभवजिनपार्श्वे प्रव्रज्यां प्रतिपद्य महानन्दमसाधयत् ।

सम्यक्तिरोभूतनिजात्मधर्मं, आविर्भवत्येव प्रशस्तयोगात् । त्यागोऽप्रशस्तस्य सुभानुरच्च, शीघ्रं विधेयोऽपररागकस्य ॥१॥

## सदाचारस्वरुपम्

स इन्द्रियजयः सदाचारत् भवति अतः सदाचारमाह—

लोकापवादभीरुत्वं दीनाभ्युद्धरणादरः । कृतज्ञता सुदाक्षिण्यं सदाचारः प्रकीर्त्तितः ॥ १ ॥

सर्वत्र निन्दासंत्यागो वर्णवादस्तु साधुषु । आपद्यदैन्यमत्यन्तं तद्वत्संपदि नम्रता ॥ २ ॥

प्रस्तावे मितभाषित्वमविसंवादनं तथा । प्रतिपन्नक्रिया चेति कुलधर्मानुपालनम् ॥ ३ ॥

असद्व्ययपरित्यागःस्थाने चैव क्रिया सदा । प्रधानकार्ये निर्बन्धः प्रमादस्य विसर्जनम् ॥ ४ ॥

लोकाचारानुवृत्तिश्च सर्वत्रौचित्यपालनम् ! प्रवृत्तिर्गर्हिते नेति प्राणैः कण्ठगतैरपि ॥ ५ ॥ इत्यादि ।

एवं वा—

विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां, प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।

असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः, सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ १ ॥

ईयं च शिष्टाचारप्रशंसा धर्मबीजाधानतया प्रेत्यधर्मप्राप्तिहेतुतया परमपदहेतुर्भवति, चौरोदाहरणेन । तथा—

कौशाम्ब्यां पुरि राजाऽस्ति जितारिर्नामविश्रुतः । जिनधर्मरसोल्लासः सद्भूतगुणसन्निधिः ॥१॥ श्रेष्ठिनौ धनयक्षाह्वौ तत्राभूतां महर्द्धिकौ । धनस्य धर्मपालोऽभून्नन्दनः कुलनन्दनः ॥२॥ यक्षस्य वसुपालश्च वसुवृद्धिविधायकः । क्रमेण यौवनं प्राप्तौ तौ द्वावपि मनोहरम् ॥ ३ ॥ जन्मान्तरीयसंस्कारादाबालत्वात्तयोरभूत् । क्षीरनीरवदत्यन्तं मैत्री विस्मयकारिणी ॥४॥ रोचते च यदेकस्य तदन्यस्यापि रोचते । ततो लोके गतौ ख्यातिमेकचित्ताविमाविति ॥ ५ ॥ ततः कुलोचितं कर्म कुर्वतो यान्ति वासराः । अन्यदा श्रीमहावीरस्तत्रागाद्विश्ववत्सलः ॥६॥ देवैः समवसरणं कृतम् । कौशाम्बीशोऽपि वन्दनार्थं समायाताः सपौरजनः । तावपि श्रेष्ठिनोः सूनू कुतूहलपरायणौ वन्दनार्थं गतौ । प्रारब्धा धर्मदेशना श्रीजिनेन ॥ ततस्तयोर्वणिक्सूनोरेकस्य तज्जिनोदितम् । श्रद्धानमार्गमायाति भाव्यते च स मनसे ॥ ७ ॥ स्फाराक्षो मस्तकं धुन्वन् कर्णपर्णपुटार्पितम् । रोमाञ्चितः पिबत्युच्चैर्जिनवाक्यं यथाऽमृतम् ॥ ८ ॥ तदन्यस्य तदाभाति वालुकाकवलोपमम् । अन्योन्यस्य च तौ भावं लक्षयामासतुस्तराम् ॥ ९ ॥ व्याख्याभुवः समुत्थाय जग्मतुर्भवनं निजम् । तत्रैको व्याजहारैवं भ्रातस्त्वं भावितः किल ॥ १० ॥ जैनवाचा न चाहं भोस्तदत्र किमु कारणम् ? । एकचित्ततया ख्यातावावां लोके इयच्चिरम् ॥ ११ ॥ इदानीमत्र संजातं विभिन्नं चित्तमावयोः । तदत्र कारणं किं स्यादन्यो वक्ति स्म विस्मितः ॥१२॥ सत्यमेवं ममाप्यत्र विकल्पः संभवर्त्तते । केवलं केवली नूनं निश्चयं नौ करिष्यति ॥ १३ ॥ स एव प्रश्नितोऽत्रार्थे तद्यातास्व तदन्तिके । एवं तौ निश्चयं

कृत्वा मातर्यातौ तदन्तिकम् ॥ १४ ॥ पप्रच्छतुस्तमाराध्य विनयेन स्वसंशयम् । सोऽप्युवाच पुरैकेन श्लाघितो युवयोर्मुनिः ॥ १५ ॥ तथा हि—

आस्तां युवां क्वचिद्ग्रामे दरिद्रकस्य तनूद्भवौ । कालक्रमेण तारुण्यं लावण्यपदमागतौ ॥१६॥ संजाततद्विकारौ च जातौ भूतेरभावतः । तथा मनोरथाः किञ्चिन्न पूर्यन्ते कथञ्चन ॥१७॥ अनार्यं कार्यमारब्धौ कर्तुं चौर्यं ततोऽन्यदा । ग्रामान्तरे हृता गावो गत्वा रात्रावतित्वरौ ॥१८॥ दण्डपाशिकलोकेन भवन्तौ त्रासितौ ततः । प्रारब्धौ नष्टुमेकोऽथ साधुः शैलगुहागतः ॥१९॥ ध्यानमौनक्रियालग्नो युवाभ्यां समदृश्यत । ततश्च धर्मपालस्य जीवेनेदं व्यचिन्त्यत ॥२०॥ अहो ! सुलब्धं जन्मास्य प्रशस्याचारसद्मनः । यदित्थं निर्भयः शान्तस्त्यक्तसङ्गोऽवतिष्ठते ॥२१॥ वयं पुनरधन्यानामधन्या धनकाङ्क्षया । विदधाना विरुद्धानि पराभवपदं गताः ॥२२॥ धिक्कारोपहतात्मानो यास्यामः कां गतिं मृताः ? । ही जाता दुःखभावेन लोकद्वय-विराधकाः ॥२३॥ तदेवं निर्मलं साधोर्वृत्तं वारितकल्मषम् । विपरीतमतोऽस्माक-मस्मात् कल्याणकं कुतः ? ॥२४॥ अन्यः पुनरुदासीनः समभूत्तं मुनिं प्रति । गुणरागादवाप्यैको बोधिबीजं न चापरः ॥ २५ ॥ ततस्तनुकषायत्वाद्भवन्तौ दानतत्परौ । नरजन्मोचितं कर्म बद्धवन्तावनिन्दितम् ॥२६॥ मृत्वा युवां समुत्पन्नावेतावत्र वणिक्सुतौ । जातावनिन्दिताचारौ वणिग्धर्म-परायणौ ॥ २७ ॥ एकस्येह तदेतस्य जातं बीजस्य तत्फलम् । सद्बोधरूपमन्यस्य निर्बीजत्वेन नाभवत् ॥ २८ ॥ एवं पूर्वभवादि श्रुत्वा जातिस्मरणं प्राप्तः संजातप्रत्ययश्च भावतो जिनोद्दिष्टधर्मपरः सिद्धिं यास्यति । अपरस्य च बोधिबीजभूत-शिष्टाचारमाध्यस्थ्यादपि संसार एव ॥

इति परिभाव्य सम्यक् शिष्टाचारगुणादिप्रशंसावता भाव्यं सुश्रावकेनेति । यतः—

अकुर्वन्नपि सत्पुण्यं शिष्टाचारप्रशंसया । दम्भसंरम्भसुमुक्तात्मा प्राणी प्राप्नोति तत्फलम् ॥ १ ॥
बिभ्राणोऽपि गुणश्रेणीरन्येषु गुणमत्सरी । निमज्जत्येव संसारे मुग्धो दुःखाकुलाशयः ॥ २॥

अतो विवेकज्ञजनेन शिष्टाचार-प्रशंसाप्रवणेन भाव्यम् ।
विशुद्धधर्मोज्ज्वलकीर्त्तिलाभा-भिलाषिणाऽत्रोचितवृत्तियुक्त्या ॥ १ ॥

## ॥ श्री आचारोपदेशः ॥

असौ सदाचारो गुणनिबन्धनं नृणां सदुपदेशाज्जायते, तत्रश्री आचारोपदेशमाह—

सुबुद्धिः सूपदेशेन ततोऽपि च गुणोदयः। इत्याचारोपदेशाख्यग्रंथः प्रारभ्यते मया ॥१॥ सदाचारविचारेण रुचिरश्च-तुरोचितः । देवानंदकरो ग्रंथः श्रोतव्योऽयं शुभात्मभिः ॥ २ ॥ पुद्गलानां परावर्तैर्दुर्लभं जन्म मानुषम् । लब्ध्वा विवेकिना धर्मे विधेयः परमादरः ॥३॥ धर्मः श्रुतोऽपि दृष्टोऽपि कृतोऽपि कारितोऽपि च। अनुमोदितोऽपि नियतं पुनात्यासप्तमं कुलम् ॥४॥ विना त्रिवर्गं विफलं पुंसो जन्म पशोरिव । तत्र स्यादुत्तमो धर्मस्तं विना न यतः परौ ॥५॥ मानुष्यमार्यदेशश्च जातिः सर्वाक्षपाटवम् । आयुश्च प्राप्यते तत्र कथंचित्कर्मलाघवात् ॥ ६ ॥ प्राप्तेषु पुण्यतस्तेषु श्रद्धा भवति दुर्लभा । ततः सद्गुरु-संयोगो लभ्यते गुरुभाग्यतः ॥ ७ ॥ लब्धं हि सर्वमप्येतत्सदाचारेण शोभते । नयेनेव नृपः पुष्पं गंधेनाज्येन भोजनम् ॥८॥

शास्त्रदृष्टेन विधिना सदाचारपरो नरः। परस्पराविरोधेन त्रिवर्गं साधयेत्सदा ॥९॥ तुर्ये यामे त्रियामाया ब्राह्मे मुहूर्त्ते कृतोद्यमः। मुंचेन्निद्रां सुधीः पंचपरमेष्ठिस्तुतिं पठन् ॥ १० ॥ वामा वा दक्षिणा वापि या नाडी वहते सदा। शय्योत्थितस्तमेवादौ पादं दद्याद्भुवस्तले ॥ ११ ॥ मुक्त्वा शयनवस्त्राणि परिधायाऽपराणि च । स्थित्वा सुस्थानके धीमान् ध्यायेत्पंचनमस्क्रियाम् ॥१२॥ उपविश्य च पूर्वाशाभिमुखो वाप्युदङ्मुखः। पवित्रांगः शुचिस्थाने जपेन्मंत्रं समाहितः ॥१३॥ अपवित्रः पवित्रो वा सुस्थितो दुःस्थितोऽपि वा। ध्यायन्पंचनमस्कारं सर्वपापैः प्रमुच्यते ॥१४॥ अंगुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलंघने। संख्याहीनं च यज्जप्तं तत्प्रायोऽल्पफलं भवेत् ॥१५॥ जपो भवेत् त्रिधोत्कृष्टमध्यमाधमभेदतः। पद्मादिविधिना मुख्योऽपरः स्याज्जपमालया ॥१६॥ विना मौनं विना संख्यां विना चेतानिरोधनम्। विना स्थानं विना ध्यानं जघन्यो जायते जपः ॥१७॥ ततो गत्वा मुनिस्थानमथवात्मनिकेतनम्। निजपापविशुद्ध्यर्थं कुर्यादावश्यकं सुधीः ॥१८॥ रात्रिकं स्याद्दैवसिकं पाक्षिकं चातुर्मासिकम्। सांवत्सरं चेति जिनैः पंचधावश्यकं कृतम् ॥१९॥ कृतावश्यककर्मा च स्मृतपूर्वकुलक्रमः। प्रमोदमेदुरस्वांतः कीर्त्तयेन्मंगलस्तुतिम् ॥२०॥

मंगलं भगवान् वीरो मंगलं गौतमः प्रभुः। मंगलं स्थूलभद्राद्या जैनो धर्मोऽस्तु मंगलम् ॥२१॥
नाभेयाद्या जिनाः सर्वे भरताद्याश्च चक्रिणः। कुर्वंतु मंगलं सीरिविष्णवः प्रतिविष्णवः ॥२२॥
नाभिसिद्धार्थभूपाद्या जिनानां पितरः समे। पालिताखंडसाम्राज्या जनयंतु जयं मम ॥२३॥
मरुदेवा त्रिशलाद्या विख्याता जिनमातरः। त्रिजगज्जनितानंदा मंगलाय भवंतु मे ॥ २४ ॥

श्रीपुंडरीकेंद्रभूतिप्रमुखा गणधारिणः । श्रुतकेवलिनोऽन्येऽपि मंगलानि दिशंतु मे ॥ २५ ॥
ब्राह्मीचंदनबालाद्या महासत्यो महत्तराः । अखंडशीललीलाढ्या यच्छंतु मम मंगलम् ॥२६॥
चक्रेश्वरीसिद्धायिकामुख्याः शासनदेवताः । सम्यग्दृशां विघ्नहरा रचयंतु जयश्रियम् ॥ २७॥
कपर्दिमातंगमुख्या यक्षा विख्यातविक्रमाः । जैनविघ्नहरा नित्यं देयासुर्मंगलानि मे ॥ २८॥
यो मंगलाष्टकमिदं पटुधीरधीते प्रातर्नरः सुकृतभावितचित्तवृत्तिः ।
सौभाग्यभाग्यकलितो धुतसर्वविघ्नो नित्यं स मंगलमलं लभते जगत्याम् ॥ २९ ॥

ततो देवालये यायात्कृतनैषेधिकीक्रियः । त्यजन्नाशातनाः सर्वास्त्रिः प्रदक्षिणयेज्जिनम् ॥३०॥ विलासहासनिष्ठ्यूत-निद्राकलहदुःकथाः जिनेंद्रभवने जह्यादाहारं च चतुर्विधम् ॥३१॥ नमस्तुभ्यं जगन्नाथेत्यादि स्तुतिपदं वदन् । फलमक्षतपूगं वा ढौकयेच्छ्रीजिनाग्रतः ॥३२॥ रिक्तपाणिर्न पश्येत राजानं दैवतं गुरुम् । नैमित्तिकं विशेषेण फलेन फलमादिशेत् ॥३४॥ दक्षिणवामांगगतो नरनारीजनो जिनम् । वंदतेऽवग्रहं मुक्त्वा षष्टिं नव करान् विभोः ॥३४॥ ततः कृतोत्तरासंगः स्थित्वा सद्योगमुद्रया । ततो मधुरया वाचा कुरुते चैत्यवंदनम् ॥३५॥ उदरे कूर्परे न्यस्य कृत्वा कोशाकृती करौ । अन्योऽन्यांगुलिसंश्लेषाद्योगमुद्रा भवेदियम् ॥३६॥ पश्चान्निजालयं गत्वा कुर्यात्प्राभातिकीं क्रियाम् । विदधीत गेहचिंतां भोजनाच्छादनादिकाम् ॥३७॥ आदिश्य स्वस्वकार्येषु, बंधून् कर्मकरानपि । पुण्यशालां पुनर्यायादष्टभिर्धीगुणैर्युतः ॥३८॥ शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । उहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥३९॥ श्रुत्वा धर्मं विजानाति, श्रुत्वा त्यजति दुर्मतिम् ।

श्रुत्वा ज्ञानमवाप्नोति, श्रुत्वा वैराग्यमेति च ॥४०॥ पचाङ्गप्रणिपातेन, गुरुन् साधून् परानपि । उपविशेन्नमस्कृत्य, त्यजन्नाशातनां गुरोः ॥४१॥ उत्तमांगेन पाणिभ्यां, जानुभ्यां च भुवस्तलम् । विधिना स्पृशतः सम्यक् पंचाङ्गप्रणतिर्भवेत् ॥४२॥ पर्यस्तिकां न बध्नीयात् न च पादौ प्रसारयेत् । पादोपरि पदं नैव दोर्मूलं न प्रदर्शयेत् ॥४३॥ न पृष्ठे न पुरो नापि पार्श्वयोरुभयोरपि । स्थेयान्नालापयेदन्यमागतं पूर्वमात्मना ॥ ४४ ॥ सुधीर्गुरुमुखन्यस्तदृष्टिरेकाग्रमानसः । शृणुयाद्धर्मशास्त्राणि भावभेदविचक्षणः ॥५५॥ अपाकुर्यात्स्वसंदेहान् जाते व्याख्याक्षणे सुधीः । गुर्वर्हद्गुणगातृभ्यो दद्याद्दानं निजोचितम् ॥४६॥ अकृतावश्यको दत्ते गुरूणां वंदनानि च । प्रत्याख्यानं यथाशक्त्या विदध्याद्विरतिप्रियः ॥४७॥ तिर्यग्योनिषु जायंतेऽविरता दानिनोऽपि हि । गजाश्वादिभवे भोगान् भुंजाना बंधनान्वितान् ॥४८॥ न दाता नरकं याति न तिर्यग् विरतो भवेत् । दयालुर्नायुषा हीनः सत्यवक्ता न दुःस्वरः ॥४९॥ तपः सर्वाक्षसारंगवशीकरणवागुरा । कषायतापमृद्वीका* कर्माजीर्णहरीतकी ॥५०॥ यद्दूरं यद्दुराराध्यं दुर्लभं यत्सुरैरपि । तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥५१॥ चतुष्पथमथो यायात्कृतधर्मविधिः सुधीः । कुर्यादर्थार्जनोपायं व्यवसायं निजं निजम् ॥५२॥ सुहृदामुपकाराय बंधूनामुदयाय च । अर्ज्यते विभवः सद्भिः स्वोदरं को बिभर्ति न ॥५३॥ व्यवसायभवा वृत्तिरुत्कृष्टा मध्यमा कृषिः । जघन्या भृत्ति सेवा तु भिक्षा स्यादधमाधमा ॥५४॥ व्यवसायमतो नीचं न कुर्यान्नापि कारयेत् । पुण्यानुसारिणी संपन्न पापाद्वर्द्धते क्वचित् ॥५५॥ बह्वारंभं महापापं यद्भवेज्जनगर्हितम् । इहामुत्र विरुद्धं यत्तत्कर्म न समाचरेत् ॥५६॥ लोहकारचर्मकारमद्यकृत्तैलिकादिभिः सत्यप्यर्थागमे कामं

---

* द्राक्ष ।

व्यवसायं परित्यजेत् ॥५७॥ एवं चरन् प्रथमयामविधिं समग्रं, श्राद्धो विशुद्धहृदयो नयराजमानम्। विज्ञानमानजनरंजनसावधानो, जन्मद्वयं विरचयेत्सफलं स्वकीयम् ॥५८॥

श्री चारित्रसुन्दरगणिविरचिते-आचारोपदेशे प्रथम प्रहर वर्ग प्रथमवर्गः ।

## अथ द्वितीयो वर्गः ।

अथ स्वमंदिरं यायाद् द्वितीये प्रहरे सुधीः। निर्जन्तुभुवि पूर्वाशाभिमुखः स्नानमाचरेत् ॥१॥ सप्रणालं चतुःपट्टं स्नानार्थं कारयेद्वरम् । तदुध्धृते जले यस्माज्जंतुबाधा न जायते ॥२॥ रजस्वलास्त्रीमलिन-स्पर्शे जाते च सूतके । मृतस्वजनकार्ये च सर्वांगस्नानमाचरेत् ॥३॥ अन्यथोत्तमांगवर्जं वपुः प्रक्षालयेत्परम् । कवोष्णेनाल्पपयसा देवपूजाकृते कृती ॥४॥ चंद्रादित्यकरस्पर्शात्पवित्रं जायते जगत् । तदाधारं शिरो नित्यं पवित्रं योगिनो विदुः ॥५॥ दयासाराः सदाचारास्ते[१] सर्वे धर्महेतवे । शिरःप्रक्षालनान्नित्यं तज्जीवोपद्रवो भवेत् ॥६॥ नापवित्रं भवेच्छीर्षं नित्यं वस्त्रेण वेष्टितम् । अध्यात्मनः स्थितेः शश्वन्निर्मलश्रुतिधारिणः ॥७॥ स्नाने येऽतिजलोत्सर्गाद् घ्नंति जंतून् बहिर्मुखाः । मलिनीकुर्वते जीवं शोधयंतो वपुर्हि ते ॥८॥ विहाय पोतिकं वस्त्रं परिधाय जिनं स्मरन् । यावज्जलार्द्रौ चरणौ तावत्तत्रैव तिष्ठति ॥९॥ अन्यथा मलसंश्लेषादपावित्र्य पुनः पदोः। तल्लग्नजीवघातेन भवेद्वा पातकं महत् ॥१०॥ गृह चैत्यांतिकं[२] गत्वा भूमिसंमार्जनादनु । परिधायार्चावस्त्राणि मुखकोशं

१ " स्युः सर्वे " इत्यादि पाठः । २ " गृहचैत्याभ्यर्णं " इत्यादि पाठः ।

दधात्यथ ॥११॥ मनोवाक्कायवस्त्रेषु भूपूजोपस्करस्थितौ । शुद्धिः सप्तविधा कार्या देवतापूजनक्षणे ॥१२॥ पुमान् परिदधेन्न स्त्री–वस्त्रं पूजाविधौ क्वचित् । न नारी नरवस्त्रं तु कामरागविवर्द्धनम् ॥१३॥ भृंगारानीतनीरेण संस्नाप्यांगं जिनेशितुः । रूक्षीकृत्य सुवस्त्रेण पूजां कुर्यात्ततोऽष्टधा ॥१४॥

## ॥ अथ पूजाष्टकम् ॥

सच्चंदनेन घनसारविमिश्रितेन, कस्तूरिकाद्रवयुतेन मनोहरेण ।
रागादिदोषरहितं महितं सुरेन्द्रैः, श्रीमज्जिनं त्रिजगती–पतिमर्चयामि ॥१५॥ चंदनपूजा[1] ॥१॥
जातिजपाबकुलचंपकपाटलाद्यै–र्मंदारकुंदशतपत्रवरारविंदैः ।
संसारनाशकरणं करुणप्रधानं, पुष्पैः परैरपि जिनेंद्रमहं यजामि ॥१६॥ पुष्पपूजा ॥२॥
कृष्णागुरुप्रचितं सितया समेतं, कर्पूरपूरसहितं विहितं सुयत्नात् ।
धूपं जिनेंद्रपुरतो गुरुतोषतोऽहं, भक्त्योत्क्षिपामि निजदुष्कृतनाशनाय ॥१७॥ धूपपूजा ॥३॥
ज्ञानं च दर्शनमथो चरणं विचिंत्य, पुंजत्रयं च पुरतः प्रविधाय भक्त्या ।
चोखाक्षतैश्च करणैरपरैरपीह, श्रीमंतमादिपुरुषं जिनमर्चयामि ॥१८॥ अक्षतपूजा ॥४॥
सन्नालिकेरपनसामलबीजपूर–जंबीरपूगसहकारमुखैः फलैस्तैः ।

---

१ "चोखाक्षतैः" इत्यादि पाठः ।

स्वर्गाद्यनल्पफलदं प्रमदप्रमोदा–द्देवाधिदेवमसमप्रशमं महामि ॥१९॥ फलपूजा ॥५॥
सन्मोहकैर्वटकमंडकशालिदालि–मुख्यरसंख्यरसशालिभिरन्नभोज्यैः ।
क्षुत्तृड्व्यथाविरहितं स्वहिताय नित्यं, तीर्थाधिराजमहमादरतो यजामि ॥२०॥ नैवेद्यपूजा ॥६॥
विध्वस्तपापपटलस्य सदोदितस्य, विश्वावलोकनकलाकलितस्य भक्त्या ।
उद्योतयामि पुरतो जिननायकस्य, दीपं तमः प्रशमनाय शमांबुराशेः ॥२१॥ दीपपूजा ॥७॥
तीर्थोदकैर्धुतमलैरमलस्वभावं, शश्वन्नदीनदसरोवरसागरोत्थैः ।
दुर्वारमारमदमोहमहाहिताक्ष्यं, संसारतापशमनाय जिनं यजामि ॥२२॥ जलपूजा ॥८॥
पूजाष्टकस्तुतिमिमामसमामधीत्य, योऽनेन चारुविधिना वितनोति पूजाम् ।
भुक्त्वा नरामरसुखान्यविखंडितानि, धन्यः स्ववासमचिराल्लभते शिवेऽपि ॥ २३ ॥

## इति पूजाष्टकम् ॥

शुचिप्रदेशे निःशल्ये कुर्याद्देवालयं सुधीः । सौधे याता वामभागे सार्द्धहस्तोच्चभूमिके ॥ २४ ॥ पूर्वाशाभिमुखोऽर्चाकृदुत्तराभिमुखोऽथवा । विदिग्भिः सह नियतं दक्षिणां वर्जयेद् दिशाम् ॥ २५ ॥ [1]पूर्वस्यां लभ्यते लक्ष्मीरग्नौ संतापसंभवः ।

---

१ "पूर्वस्यां लभते लक्ष्मीमग्नौ संताप संभवं" इत्यादि पाठः ।

दक्षिणस्यां भवेन्मृत्युर्नैर्ऋते स्यादुपद्रवः ॥२६॥ पश्चिमायां पुत्रदुःखं वायव्यां स्यादसंततिः । उत्तरस्यां महालाभ [1]ईशान्यां धमवामना ॥ २७ ॥ अंघ्रिजानुकरांशेषु मस्तके च यथाक्रमम् । विधेया प्रथमं पूजा जिनेन्द्रस्य विवेकिभिः ॥२८॥ सच्चन्दनं सकाश्मीरं विनार्चा न विरच्यते । ललाटे कण्ठे हृदये जठरे तिलकं पुनः ॥२९॥ प्रभाते शुद्धवासेन मध्याह्ने कुसुमैस्तथा । संध्यायां धूपदीपाभ्यां विधेयार्चा मनीषिभिः ॥३०॥ नैकपुष्पं द्विधा कुर्यान्न छिन्द्यात्कलिकामपि । पत्रपंकजभेदेन हत्यावत्पातकं भवेत् ॥२१॥ हस्तात्प्रस्खलितं पुष्पं लग्नं पादेऽथवा भुवि । शीर्षोपरिगतं यच्च तत्पूजार्हं न कर्हिचित् ॥३२॥ स्पृष्टं नीचजनैर्दष्टं कीटैः कुवसनैर्धृतम् । निर्गंधमुग्रगन्धं च तस्याज्यं कुसुमं समम् ॥३३॥ वामांगे धूपदाहः स्यात् बीजपूरं तु सन्मुखम् । हस्ते दद्याज्जिनेंद्रस्य नागवल्लीदलं फलम् ॥३४॥ स्नात्रैश्चन्दनदीपधूपकुसुमैर्नैवेद्यनीरध्वजे, र्वासैरक्षतपूगपत्रसहितैः सत्कोशवृद्ध्या फलैः । वादित्रध्वनिगीतनृत्यनुतिभिश्छत्रैर्वरैश्चामरै- र्भूषाभिश्च किलैकविंशतिविधा पूजा भवेदर्हतः ॥३६॥ इत्येकविंशतिविधां रचयंति पूजां, भव्याः सुपर्वदिवसेऽपि च तीर्थयोगे। पूर्वोक्तचारुविधिनाष्टविधां च नित्यं यद्यद्वरं तदिह भाववशेन योज्यम् ॥३६॥ ग्रामचैत्यं ततो यायाद्विशेषाद्धर्मलिप्सया । त्यजन्नशुचिमध्वानं धौतवस्त्रेण शोभितः ॥३७॥ यास्यामीति हृदि ध्यायंश्चतुर्थफलमश्नुते । उत्थितो लभते षष्ठं त्वष्टमं पथि च व्रजन् ॥३८॥ दृष्टे चैत्येऽथ दशमं द्वारे द्वादशमं लभेत् । मध्ये पक्षोपवासस्य मासस्य स्याज्जिनार्चने ॥३९॥ तिस्रो नैषेधिकीः कृत्वा चैत्यांतः प्रविशेत्सुधीः । चैत्यचिंतां विधाय.थ पूजयेच्छ्रीजिनं मुदा ॥४०॥ मूलनायकमर्चित्वाष्टथार्हत्प्रतिमाः पराः । पूजयेच्चारुपुष्पौघैः मृष्ट्वा चान्तर्बहिः स्थिताः

---

१ " स्यादीशान्यां धर्मवासना " इति पाठः सम्यक् ।

॥४१॥ अवग्रहाद्बहिर्गत्वा वंदेतार्हतमादरात्। विधिना पुरतः स्थित्वा रचयेच्चैत्यवंदनम् ॥४२॥ एकशक्रस्तवेनाद्या द्वाभ्यां भवति मध्यमा। पंचभिस्तूत्तमा ज्ञेया जायते सा त्रिधा पुनः ॥४३॥ स्तुतिपाठे योगमुद्रा जिनमुद्रा च वंदने। मुक्ताशुक्तिमुद्रा तु प्रणिधाने प्रयुज्यते ॥४४॥ उदरे कूर्परे न्यस्य कृत्वा कोशाकृती करौ। अन्योन्यांगुलिसंश्लेषाद्योगमुद्रा भवेदियम् ॥४५॥ पुरोऽङ्गुलानि चत्वारि पश्चादूनानि तानि तु। अवस्थितिः पादयोर्या जिनमुद्रेयमीरिता ॥ ४६ ॥ समौ च गर्भितौ हस्तौ ललाटे यत्र योजयेत्। मुक्ताशुक्तिकमुद्रा सा प्रणिधाने प्रयोजना ॥ ४७ । नत्वा जिनवरं याय द्वन्नावश्यिकां गृहम्। अश्नीयाद् बंधुभिः सार्धं भक्ष्याभक्ष्यविचक्षणः ॥ ४८ ॥ अधौतपादः क्रोधांधो वदन् दुर्वचनानि यत्। दक्षिणाभिमुखो भुंक्ते तत्स्याद्राक्षसभोजनम् ॥ ४९ ॥ पवित्रांगः शुभे स्थाने निविष्टो निश्चलासने। स्मृतदेवगुरुर्भुंक्ते तत्स्यान्मानवभोजनम् ॥५०॥ स्नात्वा देवान् समभ्यर्च्य नत्वा पूज्यजनान् मुदा। दत्वा दानं सुपात्रेभ्यो भुंक्ते भुक्तं तदुत्तमम् ॥ ५१ ॥ भोजने मैथुने स्नाने वमने दंतधावने। विड्डुत्सर्गे निरोधे च मौनं कुर्यान्महामतिः ॥ ५२ ॥ आग्नेयीं नैऋत्यं भुक्तौ दक्षिणां वर्जयेद्दिशम्। संध्ये ग्रहणकालं च स्वजनादेः शवस्थितिम् ॥ ५३ ॥ कार्पण्यं कुरुते यो हि भोजनादौ धने सति। मन्ये मंदमतिः सोऽत्र दैवाय धनमर्जति ॥ ५४ ॥ अज्ञातभाजने नाद्याद् ज्ञाति भ्रष्टगृहेऽपि च। अज्ञातानि निषिद्धानि फलान्यन्यानि च त्यजेत् ॥ ५५ ॥ बालस्त्रीभ्रूणगोहत्याकृनामाचारलोपिनाम्। स्वगोत्रभेदिनां पंक्तौ जानन्नोपविशेत्सुधीः ॥ ५६ । मद्यं मांसं नवनीतं मधूदुंबरपंचकम्। अनंतकायमज्ञातफलं रात्रौ च भोजनम् ॥ ५७ ॥ आमगोरससंपृक्तं द्विदलं पुष्पितौदनम्। दध्य-हर्द्वितयातीतं क्वथितान्नं च वर्जयेत् ॥ ५८ ॥ जंतुमिश्रं फलं पुष्प पत्रं चान्यदपि त्यजेत्। संधानमपि संसक्तं जिनधर्मपरायणः ॥ ५९ ॥ भोजनं च विड्डुत्सर्गं कुर्यादतिचिरं नहि। वारिपानं तथा स्नानं पुनः स्थिरतया सृजेत् ॥ ६० ॥ भोजनादौ

विषसमं भोजनांते शिलोपमम् । मध्ये पीयूषसदृशं वारिपानं भवेदहो ॥ ६१ ॥ अजीर्णे भोजनं जह्यात् कालेऽश्नीयाच्च सात्म्यतः । भुक्त्वोत्थितो वक्त्रशुद्धिं पत्रपूगादिभिः सृजेत् ॥ ६२ ॥ विवेकवान् न तांबुलमश्नियाद्विचरन् पथि । पूगाद्यमक्षतं दंतैर्दलयेन्न तु पुण्यवित् ॥६३॥ भोजनादनु नो स्वप्याद्विना ग्रीष्मं विचारवान् । दिवा स्वपतो देहे जायते व्याधिसंभवः ॥६४॥

॥ इति श्री रत्नसिंहसूरिश्वरशिष्य श्रीचारित्रसुंदरगणिविरचिते आ. द्वितीयो वर्गः ॥ २ ॥

## । अथ तृतीयो वर्गः ।

ततो गेहश्रियं पश्यन् विद्वद्गोष्ठीपरायणः । सुतादिभ्यो ददच्छिक्षां सुखं तिष्ठेद् घटीद्वयम् ॥ १ ॥ आत्मायत्ते गुणग्रामे दैवायत्ते धनादिके । विज्ञाताखिलतत्वानां नृणां न स्याद् गुणच्युतिः ॥ २ ॥ गुणैरुत्तमतां यादि वंशहीनोऽपि मानवः । पंकजं ध्रियते मूर्ध्नि पंकः पादेन घृष्यते ॥३॥ न खानिरुत्तमानां स्यात् कुलं वा जगति क्वचित् । प्रकृत्या मानवा एव गुणैर्जाता जगन्नुताः ॥४॥ सत्वादिगुणसंपूर्णो राज्यार्हः स्याद्यथा नरः । एकविंशतिगुणः स्याद्धर्मार्हो मानवस्तथा ॥५॥ यथा-*१अक्षुद्रहृदयः २सौम्यो ३रूपवान् ४जनवल्लभः । ५अक्रूरो ६भवभीरुश्च ७शठो ८दाक्षिण्यवान् सदा ॥६॥ ९अपत्रपिष्णुः १०सदयो ११मध्यस्थः १२सौम्यदृक् पुनः । १३गुणरागी १४सत्कथाढ्यः १५सपक्षो १६दीर्घदर्श्यपि ॥७॥ १७वृद्धानुगो

* वर्तमानकालना केटलाक श्रावकना २१ गुणो-१ उद्धतवंदणिया, २ फोगटफुलणिया, ३ वात बनावणिया, ४ दगूडोळणिया, ५ माथा उकालणिया, ६ सीसचडावणिया, ७ कानफोकणिया, ८ डोलाचडावणिया, ९ प्रश्न पुछणिया, १० असत्यचालणिया, ११ चरवला फेरवणिया, १२ टीलाकाढणिया, १३ कांनफुंकणिया, १४ आख मारणिया, १५ भूमिरुंधणिया, १६ विषउडालणिया, १७ पुंठ फुंकणिया, १८ आदेशमांगणिया, १९ निंदा करणिया, २० छिद्र जोवणिया, २१ खलेल घालणिया,-जुना पाना उपरथी उतारो करेल छे.

१८विनीतः १९कृतज्ञः २०परहितोऽपि च । २१लब्धलक्षो धर्मरत्नयोग्योऽमिभिर्गुणैर्भवेत् ॥८॥ ×प्रायेण राजदेशस्त्रीभक्तवार्तां त्यजेत्सुधीः । यतो नार्थागमो कश्चित्प्रत्युतानर्थसंभवः ॥९॥ सुमित्रैर्बन्धुभिः सार्द्धं कुर्याद्धर्मकथां मिथः । तद्विद्भिः सह शास्त्रार्थरहस्यानि विचारयेत् ॥१०॥ पापबुद्धिर्भवेद्यस्मात् वर्जयेत्तस्य संगतिम् । कायेन वचनेनापि न्यायं मुंचेन्न कर्हिचित् ॥११॥ अवर्णवादं कस्यापि न वदेदुत्तमाग्रणीः । पित्रोर्गुरोः स्वामिनोऽपि राजादिषु विशेषतः ॥१२॥ मूर्खैर्दुष्टैरनाचारै र्मलिनैर्धर्मनिन्दकैः । दुःशीलोर्मिभिश्चौरैः संगतिं वर्जयेदलम् ॥१३॥ अज्ञातप्रतिभूः कीर्त्यै अज्ञातस्थानदो गृहे । अज्ञातकुल-संबंधी अज्ञातभृत्यरक्षकः ॥१४॥ १स्वस्योर्ध्वे कोपकर्ता च २स्वस्योर्ध्वं रिपुविग्रही । ३स्वस्योर्ध्वं गुणगर्वी च ४स्यौर्ध्वं भृत्य-संग्रही ॥१५॥ उद्धाराद्दणमोक्षार्थी भोक्ता भृत्यस्य दण्डनात् । द स्थ्ये पूर्वार्जिताशंसी स्वयं स्वगुणवर्णकः ॥१६॥ *ऋणाद्धर्मं विजानाति त्याज्यं दत्ते धने सति । विरोधं स्वजनैः सार्द्धं स्नेहं च कुरुते परैः ॥१७॥ उक्त्वा स्वयं च हसति यत्तत्त्वादति वक्ति च । इहामुत्र विरुद्धानि मूर्खचिह्नानि संत्यजेत् ॥१८॥ १न्यायार्जितधनश्चर्यामदेशाकालयोस्त्यजन् । राजविद्वेषिभिः

---

× "प्रायो न राजेदशस्त्रीभक्तवार्तां मृजेत्सुधीः" इत्यपि पाठः। १ पोताना वडील उपर कोप करनार, २ पोताना प्रिय माणसनी साथे झगडो करनार, ३ पोताथी अधिक गुणी साथे विवाद करनार अने ४ उंचा दरज्जाना माणसोने नोकर राखनार. * "ऋणाद्धर्मावदाती च" इत्यपि पाठः । १ इह स्वामिद्रोह–मित्रद्रोह–विश्वस्तवञ्चनाचौर्यादिगर्ह्यार्थोपार्जनोपायभूतः स्वस्ववर्णानुरूपः सदाचारो न्यायस्तेन सम्पन्न उपागतो विभवः सम्पद्यस्य सः, तथा शुद्धव्यवहारोपार्जितो हि विभव इहलोकसुखायाशङ्कनीयतया स्वशरीरेण तत्फलपरिभोगान्मित्रस्वजनादौ संविभागकरणाच्च । यदाह—

संगं विरोध च धनैः समम् ॥१९॥

**सर्वत्र शुचयो धीराः स्वकर्मबलगर्विताः । कुकर्मनिहतात्मानः पापाः सर्वत्र शङ्किताः ॥ १ ॥**

इहान्यायप्रवृत्तौ पुरुषस्य द्विविधाभिशङ्कनीयता, भोक्तुर्भोग्यविभवस्य च। तत्र भोक्तुः परद्रव्यद्रोहकार्ययमित्येवं दोषसंभावनलक्षणा। भोग्यस्य पुनः परद्रव्यमिदमित्थमनेन भुज्यते, इत्येवंरूपा। तत्प्रतिषेधादनभिशङ्कनीयता, तया। अत्रायं भावः—न्यायोपार्जितवित्तव्ययं कुर्वाणो न केनापि कदाचित्किञ्चिदभिशङ्क्यते। एवं चाव्याकुलचेतसः प्रशस्तपरिणतेरिहलोकेऽपि महान् सुखलाभः सर्वत्र यशःप्रशंसाप्राप्तिश्च। परलोकहिताय च सत्पात्रादिषु विनियोगेन पुण्यानुबन्धिपुण्यप्राप्तिहेतुत्वात् दीनानाथादिषु कृपया वितरणाच्च। इह न्यायार्जितवित्त सत्पात्रादिविनियोगाभ्यां चतुर्भङ्गी यथा—"न्यायागतविभवसत्पात्रविनियोगः १" अयं चाक्षेपेण पुण्यानुबन्धिपुण्यहेतुत्वात्। सुदेवत्वभोगभूमिः मनुष्यसम्यक्त्वादि प्राप्त्यासन्नसिद्धिफलो धनसार्थवाहशालिभद्रादिवत्। यदाह—

**परितुलियकप्पपायवचिन्तामणि कामधेणुमाहप्पं। दाणाओ सम्मत्तं, पत्तं धणसत्थवाहेणं ॥ १ ॥**

यद्वा नन्दिषेणादिवत्—

क्वापि संनिवेशे कोऽपि ब्राह्मणो धनौघैधनदस्पर्द्धी यज्ञप्रारम्भे ब्राह्मणलक्षभोज्यं प्रारब्धवान्। तत्र सहाय्यार्थं कमपि जैनं दानरुचिं निःस्वब्राह्मणं लक्षभोज्यसमाप्तावुद्धरितं धनाज्यादि तुभ्यं दास्यामीति प्रतिज्ञाय स्थापितवान्। क्रमेण लक्षभोज्यसंपूर्त्तौ शेषं तन्दुलादिकं न्यायागतं प्रासुकं मत्वा निःस्वद्विजेनाचिन्ति; यदुतैतत्क्वापि सत्पात्राय दीयते तदा बहुफलं जायते। यतः—

"नायागयाणं कप्पणिज्जाणं अन्नपाणाइदव्वाणं पराए भत्तीए आयानुग्गहबुद्धीए संजयाणं दाणं अतिहिसंविभागो मुक्खफलो॥"

तदनु तेन दयाब्रह्मचर्यादिगुणवन्तः कियन्तः साधर्मिका भोजनाय निमन्त्रिताः, तद्भोजनावसरे च कश्चिन्महाव्रती मासक्षपणपारणे समागात् । तेन द्विजेन सत्कारश्रद्धापूर्वकं तदन्नापानादि तस्मै दत्तं, एतेभ्योऽप्ययं यती विशेषपात्रमिति निश्चित्य । उक्तं च—

**मिथ्यादृष्टि सहस्रेषु, वरमेको ह्यणुव्रती । अणुव्रतीसहस्रेषु, वरमेको महाव्रती ।**
**महाव्रति सहस्रेषु, वरमेको हि तात्त्विकः । तात्त्विकस्य समं पात्रं, न भूतं न भविष्यति ॥ २ ॥**

कालेनायुः परिसमाप्तौ स पात्रदानदाता तद्दानमहिम्ना प्रथमकल्पे सुरः समजनि । ततश्च्युत्वा राजगृहे श्रेणिक सुतो [१]नन्दिषेणनामा जातः । यौवने पञ्चशतराजकन्यापाणिग्रहणम् । [२]दोगुन्दुकदेव इव मनोरमविषयसुखोदधिमग्न आस्ते । इतश्च स लक्षभोज्यकारी विप्रः पापानुबन्धिपुण्यपोषकस्तादृग्नुर्निर्विवेकदानाद्बहुभवेषु किञ्चिद्भोगादिसुखानि भुक्त्वा क्वाप्यरण्ये हस्ती जातः । पूर्वयूथेशविनाशितानेकहस्तिसुतया करिण्या यूथेशं वञ्चयित्वा तापसाश्रमे जनितो मुक्तश्च । तत्र तापसकुमारैः सह वृक्षसेचनात्तापसैः कृतसेचनकनामाऽभूत् । अन्यदा पितरं यूथेशं हत्वा हस्तिनीयूथं गृहीतवान् । मातुश्च प्रपञ्चं ज्ञातपूर्वी तापसाश्रमं बभञ्ज । तापसैः [३]खिन्नैः श्रेणिकस्य स गजो दर्शितः । स चैवंभूतः । यथा—

**तुङ्गः सप्तकरान् दीर्घो नवहस्तांस्त्रीन् विस्तृतः । दशहस्तपरिणाहो विंशत्या भूषितो नखैः ॥१॥**
**आरोपितधनुर्वंशः प्रोच्चैः कुम्भो लघुर्गले । मधुपिङ्गलनेत्रश्च चञ्चच्चन्द्रोज्ज्वलद्युतिः ॥२ ।**
**चत्वारिंशत्समधिकचतुःशतसुलक्षणः । स द्विपो भद्रजातीयः सप्ताङ्ग सुप्रतिष्ठितः ॥३॥**

---

१ "नन्दिषेणो नाम्ना" । २ "दोगन्दुक" "दोगुन्दुक" । ३ "खेदितः" ।

श्रेणिकेनापि कथंचिद् धृत्वा पट्टहस्ती कृतः। राजयोग्याहाराच्छादनादिभिः परिचर्यमाणः सुखी जातः। अथान्यदा तापसैरस्मदाश्रमभञ्जनफलमेतदिति स्मारितमर्मा स्तम्भमुन्मूल्य निर्गतः। पुनस्तापसाश्रमो भग्नः पृष्ठौ श्रेणिकः सपरिकरः। हस्ती [1]दुर्दमः। केनापि वशीकर्तुमशक्यः। नृपादेशेन नन्दिषेण कुमारेण हक्कितः सन् तं कुमारं दृष्ट्वा ममैष क्वापि सम्बन्धीतीहापोहवशाज्जातजातिस्मृतिः शान्त एव तस्थौ। ततः कुमारेणानीयालानस्तम्भे निबद्धः श्रेणिकादीनां विस्मयश्च।

अत्रान्तरे वैभारगिरौ श्रीवीरजिनः सम वसृतः। श्रेणिकाभयनन्दिषेणादयो वन्दनार्थं प्राप्ताः। धर्मदेशनान्ते स्वामिपार्श्वे पृच्छा हस्त्युपशमादि विषया। कथितश्च जिनेन पूर्वभवलक्षभोज्यसाधुदानादिव्यतिकरः। पुनरागामिभवप्रश्ने जिनः प्राह—राजन्! न्यायागतवित्तसुपात्रविनियोगेन नन्दिषेणकुमारोऽनेकान् देवमनुजादि महाभोगान् भुक्त्वा संयमं प्राप्य देवभूयं प्राप्तः, क्रमेण सिद्धिसुखमवाप्स्यतीति। गजजीवस्तु तादृग्द्रव्यपात्राविवेचकतया दानादिना भोगान् प्राप्तवान्, परं प्रेत्य प्रथमनरकगामीति श्रुत्वा प्रबुद्धः श्राद्धधर्मं प्रपन्नः। क्रमेण दीक्षां गृह्णन् देवतया तत्राद्यापि भोगकर्म बह्वस्तीति वचोभिर्निषिद्धोऽपि प्रव्रज्यां जग्राह। प्राक्तननिकाचितभोगकर्मोदयप्रेरितो वेश्यागृहे १२ वर्षाणि तस्थौ प्रतिदिनं दश दश प्रबोधकृत्, इत्यादि नन्दिषेणकथाऽन्यतो ज्ञेया॥

**इत्थं गृही दानविधौ विधिज्ञो, न्यायार्जितार्थः शुभपात्रपोषी।**
**आवाप्य भोगान् सुभगान् क्रमेण, सिद्धिश्रियः संश्रयते सुखानि॥ १॥**

"न्यायागतद्रव्ययत्त्पात्रपोषरूपो द्वितीयः" यत्र तत्र भवेषु भोगमात्रफलोऽपि प्रान्ते विरसफल एव, लक्षभोज्यकृद् ब्राह्मणवत्। यदाह—

---

[1] "दुर्मत्तः"।

"दानेन भोगानाप्नोति यत्र तत्रोपपद्यते"। "अन्यायात विभव सत्पात्रपरिपोषरूपः तृतीयः" सुक्षेत्रोप्तसामान्यबीजफलप्ररोहादिवदायतौ सुखप्रसवानुबन्धितया राज्ञां व्यापारिणं बह्वारम्भोपार्जितद्रव्याणां चानुज्ञातः। यतः—

खलोऽपि गवि दुग्धं स्यादुग्धमप्युरगे विषम्। पात्रापात्रविशेषेण तत्पात्रे दानमुत्तमम्॥१॥

सा साई तंपि जलं पत्तविसेसेण अंतरं गुरुअं। अहिमुहपडिय गरलं सिप्पउडे मुत्तियं [1]जाइ॥२॥

अन्यथा महारम्भानुचितवृत्तिमेलितं द्रव्यं सुक्षेत्रवापादि विना दुर्गतिफलमेव ममणादिवद्। यतः—

ववसायफलं विहवो विहवस्स फलं सुपत्तविणिओगो, तय भावे ववसाओ विहवोऽवि य दुग्गइनिमित्तं॥१॥

अन्यायार्जितार्थकुपात्रपोषादिरूपश्चतुर्थः" इह साधुजनगर्हितत्वात्परत्र कुगतिनिबन्धनत्वाच्च त्याज्य एव विवेकिनाम्। यतः—

अन्यायोपात्तवित्तस्य, दानमत्यन्तदोषकृत्। धेनुं निहत्य तन्मांसैर्ध्वांक्षाणामिव तर्पणम्॥१॥

अन्यायोपार्जितैर्वित्तैर्यच्छ्राद्धं क्रियते जनैः। तृप्यन्ते तेन चाण्डाला बुक्कसा दासयोनयः॥२॥

दत्तः स्वल्पोऽपि भद्राय स्यादर्थो न्यायसंगतः। अन्यायात्तः पुनर्दत्तः पुष्कलोऽपि फलोज्झितः॥३॥

अन्यायवृत्त्याऽर्जितवित्तं लोकद्वयेऽप्यहितायैव। यतः—इह हि लोकविरुद्धकारिणो वधबन्धादयो दोषाः, परत्र नरकपतनादयश्च। यद्यपि कस्यचित्पापानुबन्धिपुण्यकर्म[2]फलादैहलौकिकी विपन्न दृश्यते, तथाऽप्यायत्यामवश्यम्भाविन्येव। यदाह—

पापेनैवार्थरागान्धः फलमाप्नोति यत्क्वचित्। बडिशामिषवत्तत्तमविनाश्य न जीर्यति॥१॥

---

१ "जायइ"। २ "बला–"।

उक्तं च—

अन्यायोपात्तवित्तेन यो हितं हि समीहते । भक्षणात्कालकूटस्य सोऽभिवाञ्छति जीवितुम् ॥ २ ॥

तथा इहान्यायार्जितार्थोपजीविनो गृहस्थादेः प्रायोऽन्यायकलहाहङ्कारपापबुद्धिप्रवृत्तिरेव, रङ्कश्रेष्ठ्यादिवत् । यथा—

मरुस्थल्यां पल्लीग्रामे काकूपातकौ भ्रातरौ । तयोः कनीयान् धनी । ज्यायांस्तु निःस्वत्वेन तद्गृहे भृत्यवृत्त्या निर्वहते । एकदा वर्षारात्रौ दिवसकर्मपरिश्रान्तः काकूयाको रात्रौ प्रसुप्तः । पातकेनाभिदधे—भ्रातः ! स्वकेदाराः पयःपूरैः स्फुटितसेतवः, तत्र तु निश्चिन्ततया इत्युपालब्धः । स तदा त्यक्तस्रस्तरः स्वं दरिद्रिणं परगृहकर्मकारिणं निन्दन् कुद्दालं लात्वा यावत्तत्र याति तावत्कर्मकरान् स्फुटितसेतुबन्धरचनापरान् दृष्ट्वा, के यूयमिति पृष्टाः । भवद्भ्रातुः कामुकाः इति तैरुक्ते क्वापि मदीयास्ते सन्ति ? इति पृष्टे वलभीपुर्यां सन्तीति ते प्राहुः ।

अथ कालक्रमेण प्रस्तावं प्राप्य वलभ्यां गतः सकुटुम्बः । तत्र गोपुरासन्नवास्याभीराणां संनिधौ निवसन् अत्यन्तकृशतया तै रङ्क इति दत्ताभिधानस्तार्णमुटजं कृत्वा तेषामवष्टम्भेनाट्टं मण्डयित्वा तस्थौ । एकदा कश्चित् कार्पटिकः कल्पप्रमाणेन रैवतशैलादलाबुना सिद्धरसमादाय मार्गे काकूतुम्बीति सिद्धरसादशरीरिणीं वाणीं निशम्य जातभीर्वलभीपरिसरे तस्य सच्छद्मनो वणिजः सद्मनि तदलाबुम्तत्रोपनिधी· चक्रे । स स्वयं सोमनाथयात्रार्थं गतः । कस्मिन्नपि पर्वणि पाकविशेषाय चुल्ली नियोजितायां तापिकायामलाबुरन्ध्रद्गलितरसबिन्दुना हिरण्यमयीं निभाल्य स वणिक् तं सिद्धरसं निर्णीय तदलाबुसहितं गृहसारमन्यत्र स्थापयित्वा स्वगृहं प्रज्वालितवान् । अपरस्मिन् गोपुरे गृहं कृत्वा स्थितः ।

तत्र निवसता आज्याज्यक्रयकारिण्याः स्वयं घृतं तोलयंस्तदक्षीणतादर्शनाद् घृतपात्राधः कृष्णचित्रककुण्डलिकां निश्चित्य केनापि छद्मना तां गृहीतवान् । एवं कपटकूटतुलमानव्यवहारादिभिः पापानुबन्धिपुण्यबलेन व्यवसायपरस्य रङ्कश्रेष्ठिनो मिलितं बहु द्रव्यम् ।

एकदा कश्चित्स्वर्णसिद्धिकर्ता मिलितः । सोऽपि कपटवृत्त्या वञ्चितो गृहीता सुवर्णसिद्धिः । एवं त्रिविधसिद्ध्याऽनेककोटिधनेश्वरो जातः परमन्यायार्जितविभवपरिशीलनेन पूर्वं निर्धनस्य पश्चाद्धनसम्पत्त्युत्सेकतया च क्वापि तीर्थे सत्पात्रेऽनुकम्पास्थाने वा स्वश्रियो न्यासो दूरे तिष्ठतु, प्रत्युत सकललोकोच्चाटन–नवनवकरवर्द्धनाऽहङ्कारपोषान्यधनिस्पर्द्धामत्सरादिभिस्तां रमां कालरात्रिरूपां लोकायाऽदर्शयत् ।

अथान्यदा स्वसुतारत्नखचितकङ्कतिकायां राज्ञा स्वपुत्रीकृते मार्गितायां तद्विरोधात्स्वयं म्लेच्छमण्डले गत्वा कनककोटीर्दत्वा मुद्गलान् समानयत् । तैर्देशभङ्गे कृते रङ्केन राज्ञः सूर्यमण्डलागच्छत्तुरगरक्षकान् करवितरणैर्विभिद्य कूटप्रपञ्चः कारितः पुरा हि राजा सूर्यवरप्राप्तं दिव्य-तुरङ्गमारोहति तदनु सङ्केतितपुरुषैः पञ्चशब्दवादनं क्रियते । तुरगो व्योम्नि याति । तमारूढो नृपो वैरिणो हन्ति । संग्रामसमाप्तौ तुरगः सूर्यमण्डलं प्रविशति । तदा च रङ्कभेदितपञ्चशब्दवादकै राज्ञस्तुरगारोहणात् पूर्वमेव पञ्चशब्दनादः कृतः । तुरगः समुड्डीय गतः । शिलादित्यनृपः किंकर्तव्यतामूढस्तैर्निजघ्ने । तदनुसुखेन वलभीभङ्गः सूत्रितः ।

उक्तं च—

**पणसयरी वाससयं तिन्निसयाइं अइक्कमेऊणं। विक्कमकाला उ तओ वलहीभंगो समुप्पन्नो ॥१॥**

मुद्गला अपि रणे पातयित्वा मारिताः[१] ।

एवमन्यायवित्तविलसितं ज्ञात्वा न्यायार्थार्जनपरैर्भाव्यम् । तथा व्यवहारापरिहारा[२]यातवित्तोपजीविनां पिण्डप्रकृतिधर्मकर्मादयोऽपि शुद्धा एव । यदागम :—

१ इतोऽग्रे—"इति रङ्कश्रेष्ठिसम्बन्धः" इत्यधिकम् । २ इतोऽग्रे—"ऽव्यवहारपरिहारत—" इत्यधिकम् ।

ववहारसुद्धो धम्मस्स मूलं सव्वन्नुभासए । ववहारेणं तु सुद्धेणं अत्थसुद्धी जओ भवे ॥१॥
सुद्धेणं चेव अत्थेणं आहारो होइ सुद्धओ । आहारेणं तु सुद्धेणं देहसुद्धी जओ भवे ॥२॥

व्याख्या—शुद्धेनैव चार्थेनाहारोऽशनादिः शुद्धो निर्दोषः, तेन पुनः शुद्धेन देहशुद्धिः बाह्यमलसद्भावे जिनाज्ञावर्तित्वेन कर्ममलापगमात् ।

सुद्धेणं चेव देहेणं धम्मजुग्गो य जायई । जं जं कुणइ किच्चं तु तं तं से सफलं भवे ॥३॥

शुद्धेनैव च देहेन धर्मयोग्यो जायते गृहस्थः । यथा हि प्रक्षालिताङ्गः सदलङ्कारार्हो भवति यथाऽयमपीत्थं शुद्धदेहो धर्मरत्नालङ्कारयोग्यः ततश्च यद्यत्करोति कृत्यं देवार्चादानानुष्ठानादिकं तत्तत्तस्य सफलं स्वर्गमोक्षफलदमेव भवेत् । अथ व्यतिरेकमाह—

अन्नहा अफलं होइ जं जं किच्चं तु सो करे । ववहारसुद्धिरहिओ य धम्मं खिंसावए जओ ॥४॥

[1]खिंसया यत्स्यात्तदाह—

धम्मखिंसं कुणंताणं अप्पणो य परस्सय । अबोही परमा होइ इइ सुत्ते विभासियं ॥५॥

लोकोऽपि यादृग्विध आहारस्तादृगेव पिण्डप्रकृतिबन्धः । यथा तुरङ्गमा बाल्ये महिष्याः पीतपयस्काः पयसि पतन्ति, गवां पीतदुग्धाः पानीयादूरत एव तिष्ठन्ति । तथा मनुष्योऽपि बाल्याद्यवस्थाभुक्ताहारानुसारिप्रकृति । अतो न्यायार्जितार्थ एव धर्मवृद्धिहेतुः । तथाऽन्यायोपार्जितं बर्षादिप्रान्ते राजचौराग्निजलादिभिरपह्रियमाणत्वान्न चिरस्थायि नाऽपि स्वदेहभोगपुण्यव्ययादिहेतुरपि । उक्तं च—

---

१ इतोऽग्राक्–“ गर्हत्यविवेकि लोकैरिति ” इत्यधिकम् ॥

**अन्यायोपार्जितं वित्तं दशवर्षाणि तिष्ठति । प्राप्ते त्वेकादशे वर्षे समूलं च विनश्यति ॥१॥**

वञ्चकश्रेष्ठिन इव—

क्वापि संनिवेशे हेलाकः श्रेष्ठी, हली भार्या, भलाकः सुतः । श्रेष्ठी मधुरालाप–कूटतुलामान–नवपुराणादिमीलन–रसभेद–चौरापहृतादानादि पापव्यवहारप्रकारैर्मुग्धग्रामल्लोकवञ्चनवृत्त्या धनार्जकः । स हि परवञ्चनया परमार्थतः १स्वात्मवञ्चक एव । यतः—

**कौटिल्यपटवः पापा मायया बकवृत्तयः । भुवनं वञ्चयमाना वञ्चयन्ते स्वमेव हि ॥१॥**

मिलितमपि द्रव्यं वर्षप्रान्तेऽन्यायायातत्वाच्चौराग्निराजादिभिरपह्रियते, गृहे न किमपि मिलत्येकत्र । क्रमेण सुतो यौवने ग्रामान्तरवासिसुश्रावकश्रेष्ठिसुतां परिणायितः । वधूर्गृहे समायाता । श्राविका ज्ञातधर्मा । श्रेष्ठिनोऽड्डं गृहासन्नम् । श्रेष्ठी ग्रहणदानाद्यवसरे पूर्वसंकेतितपञ्चपोकरत्रिपोकरमान२कसम्बन्धेन सुतस्यापि पञ्चपोकररूपापरनामाह्वानं करोति । क्रमेण लोकैर्ज्ञातवृत्तान्तैर्वञ्चकश्रेष्ठीति नामान्तरं दत्तं श्रेष्ठिनः । एकदा बध्वा भर्त्ता पृष्टः । कस्मात्तातो युष्मानपरनाम्नाऽऽकारयति ? तेन सर्वोऽपि व्यवसायव्यतिकरोऽकथि । वध्वा धर्मार्थिन्या श्रेष्ठि विज्ञप्तः । एवं पापव्यवहारादिनाऽऽर्जितं वित्तं न धर्मकर्मणे, नापि भोगाय, गृहेऽपि न तिष्ठति । ततो ३न्यायार्थार्जनं श्रेयः । श्रेष्ठिनोक्तं कथं निर्वाहः ? न्यायेन व्यवहरतो लोकः४ कोऽपि न विश्वसिति । वध्वोक्तं स्वल्पमपि व्यवहारशुद्धं बहु बहु मिलति तिष्ठति च । सुक्षेत्रोप्तबीजवद्बहुफलं, निःशंकतया भोगादिप्राप्तेर्मनसः सुखसमाधिलाभश्च । यदि न प्रत्ययो भवता तदा षण्मासीं यावत्कुटवृत्तिपरिहारेण न्यायवृत्त्या व्यवसायं कुरुध्वम् । ततो वधूवचसा श्रेष्ठी तथा चक्रे । षण्मास्यां पञ्चसेरमितं स्वर्णमर्जितम् । सत्यवादित्वसत्यकारितत्वादिना ग्राहकाः

---

१ "स्वार्थवञ्चकः" । २ "नासक" । ३ "ऽन्यायान्नार्थार्जनं श्रेयः" । ४ "लोके" ।

सर्वेऽपि तस्यैवाट्टे गृह्णन्ति ददति च । लोके कीर्तिः, सर्वेषां विश्वासश्च । स्वर्णमानीय वध्वाः समर्पितम् । वधूः प्राह---परीक्षां कुरुत । ततः पञ्चसेरी कारिता । चर्म वेष्टितां स्वनामाङ्कां च कारयित्वा त्रिदिनीं राजपथे मुमोच । केनापि न दृष्टा । ततो लात्वा क्वापि महाजला-शये क्षिप्ता, मत्स्येन गलिता । मत्स्योऽपि कस्यचिज्जालिकस्य जाले पपात । पाटनानन्तरं निर्गता पञ्चसेरी । नाम्नोपलक्ष्य श्रेष्ठिनोऽट्टे मात्स्यि-केनानीता, किञ्चिद्दत्वा गृहीता । वधूवचसि प्रत्ययो जज्ञे ।

ततः शुद्ध व्यवहारपरेण बहुवित्तान्युपार्जयन् सप्तक्षेत्र्यामनेकधा व्ययं कुर्वन् प्रौढिं परां प्राप । तदनु सर्वोऽपि लोकः शुद्धद्रव्यमेतस्येति कृत्वा व्यवसायाद्यर्थं कलान्तरादिना गृण्हाति । प्रवहणपूरणेऽपि तस्यैव द्रव्यं विघ्ननिवृत्त्यर्थं क्षिप्यते । कालेन तन्नाम्नाऽपि सर्वत्र वृद्धिरिति कृत्वाऽद्यापि प्रवहणचालनावसरे "हेलउ हेलउ" इति लोकाः कथयन्ति ॥

एवं शुद्धव्यवहार इहापि प्रतिष्ठाहेतुः । तस्मान्न्याय एव परमार्थतोऽर्थोपार्जनोपायोपनिषत् । उक्तं च—

**सुधीरर्थार्जने यत्नं कुर्यान्न्यायपरायणः । न्याय एवानपायोऽयमुपायः सम्पदां यतः ॥१॥**

तथा—

**वरं विभव वन्ध्यता सुजनभावभाजां नृणा—मसाधुचरितार्जिता न पुनरूर्जिताः सम्पदः ।**
**कृशत्वमपि शोभते सहजमायतौ सुन्दरं, विपाक विरसा न तु श्वयथुसंभवा स्थूलता ॥१॥**
**विहाराऽऽहार—व्याहार—व्यवहारास्तपस्विनाम् । गृहिणां तु व्यवहार एव शुद्धो विलोक्यते ॥२॥**

तथाऽन्यायोपलक्षणाद्देवद्रव्यज्ञानपाषण्डिपार्श्वस्थादिधनेन व्यवसायकरणं, व्याजेन ग्रहणाद्यपि महादोषकृत् । यदाह—

अन्यायदेवपाषण्डितद्धनानां धनेन यः । वृद्धिमिच्छति मुग्धोऽसौ विषमत्ति जिजिविषुः ॥१॥

लौकिकेऽपि—

देवद्रव्येण या वृद्धिर्गुरुद्रव्येण यद्धनम् । तद्धनं कुलनाशाय मृतोऽपि नरकं व्रजेत् ॥१॥

प्रभास्वे मा मतिं कुर्यात्प्राणैः कण्ठगतैरपि । अग्निदग्धाः प्ररोहन्ति प्रभादग्धो न रोहति ॥२॥

प्रभास्वं ब्रह्महत्या च दरिद्रस्य च यद्धनम् । गुरुपत्नी देवद्रव्यं स्वर्गस्थमपि पातयेत् ॥३॥

अत्र लौकिकी कथा । पुरा श्रीरामराज्ये—

एकदा कुक्कुरः कश्चिन्निविष्टो राजवर्त्मनि । केनचिद्ब्रह्मपुत्रेण कर्करेण हतः श्रुतौ ॥१॥

श्वा निर्यल्लोहितो न्यायस्थानं गत्वा निविष्टवान् । भूपेनाहूय पृष्टोऽवग् निरागाः किमहं हतः ? ॥२॥

तद्घातकं ब्रह्मपुत्रं तत्रानान्य्य नृपोऽब्रवीत् । असौ त्वद्घातको ब्रुहि कोऽस्य दण्डो विधीयते ॥३॥

श्वाऽवोचदत्र रुद्रस्य माठापत्ये नियोज्यताम् । क एष दण्डो राज्ञेति पृष्टः श्वा च पुनर्जगौ ॥४॥

प्रागहं सप्तजन्मभ्यः पूजयित्वा सदा शिवम् । देवस्वभीत्या प्रक्षाल्य पाणी भोजनमाचरम् ॥५॥

स्त्यानाज्यमन्यदा लिङ्गपूरणे लोकढौकितम् । विक्रीणानस्य काठिन्यान्नखान्तः प्राविशन्मम ॥६॥

विलीनमुष्णभुक्तेनाजानता तन्मयाहृतम् । तेन दुष्कर्मणा सप्तकृत्वो जातोऽस्मि मण्डलः ॥७॥

सप्तमेऽस्मिन् भवे राजन् । जाता जातिस्मृतिर्मम । अधुना त्वत्प्रभावेणोत्पन्ना वाग् मानुषी मम ॥८॥

एवमज्ञानतो भुक्तं, देवस्वं दुःखकारणम् । रक्षणीयमतस्तद्धि विवेकज्ञैः स्वशक्तितः ॥९॥
न विषं विषमित्याहुर्देवस्वं विषमुच्यते । विषमेकाकिनं हन्ति देवस्वं पुत्रपौत्रकम् ॥१०॥

स्मृतौ ॥

नन्वेवं व्यवहार प्रतिषेधे गृहस्थस्य वित्तप्राप्तिरेव न भविष्यति, तत्कथं निर्वाहव्यवच्छेदे धर्महेतुश्चित्तसमाधिलाभः स्यात् ? इत्याशङ्क्याह– न्याय एव ह्यर्थाप्त्युपनिषत्परा, न्याय एव च परमार्थतोऽर्थोपार्जनोपायरहस्यम् । यदाह–

निपानमिव मण्डूकाः सरःपूरमिवाण्डजाः । शुभकर्मणिमायान्ति विवशाः सर्वसम्पदः ॥१॥

तथा–

नोदन्वानर्थितामेति न चाम्भोभिर्न पूर्यते । आत्मा तु पात्रतां नेयः पात्रमायान्ति संपदः ॥१॥

शुद्धव्यवहारश्चतुर्द्धा । यदुक्तम्–

उजुववहारो चउद्दा जहत्थभणणं १ अवंचिगा किरिया । हुंतावायपगासण ३ मित्तीभाव य सब्भावा ४ ॥१॥

ऋजुरकुटिलः शुद्धो व्यवहाराख्यगुणस्तुचतुर्द्धा । यथा यथार्थभणनमविसंवादिवचनं धर्मक्रयविक्रयसाक्षिव्यवहारादौ । अयं भाव :–

परवंचणबुद्धीए धम्ममधम्मं च जाणिऊण सया । न भणंति भावसड्ढा भणंति सच्चं च महुरं च ॥१॥
कयविक्कयसट्टीसुवि ऊणब्भहियं कहंति न हु अग्घं । सक्खित्तेवि निऊत्ता न अन्नहा वाइणो हुंति ॥२॥
रायसभाइगयावि हु जणं न दूसंति अलियभणिएहिं । धम्मोवहासजणगं वयणं वज्जंति धम्मरया ॥३॥

कमलश्रेष्ठ्यादिवत् । तथा "अवश्चिका क्रिया" परव्यसनाहेतुका मनोवाक्कायव्यापाररूपा चेष्टा ॥ यदुक्तम्—

**तप्पडिरूवगविहिणा तुलापलाईहिं ऊणमब्भहियं । लिंतो दिंतोपि परं न वंचए सुद्धधम्मत्थी ॥१॥**

अवञ्चकोपलक्षणात् स्तेनाहृततत्प्रयोगादेरपि वर्जनं अष्टादशप्रसिद्धिपरित्यागपूर्वकम् । ताश्चेमाः—

**चौर १ श्चौरापको २ मन्त्री ३ भेदज्ञः ४ काणकक्रयी ५ अन्नदः ६ स्थानद ७ श्चैव चौरः सप्तविधः स्मृतः ॥१॥**

तत्र काणकक्रयी बहुमूल्यमपि अल्पमूल्येन चौराहृतं काणकं हीनं कृत्वा क्रीणाति ।

**भलनं१ कुशलं२ तर्जा३ राजभोगो४ऽवलोकनम्५ । अमार्गदर्शनं शय्या७ पदभङ्ग७ स्तथैव च ॥१॥**

**विश्रामः९ पादपतन१० मासनं११ गोपनं१२ तथा । खण्डस्य खादनं१३ चैव तथाऽन्यन्माहराजिकम१४ ॥२॥**

**पद्या१५ ग्न्यु१६ दक१७ रज्जूनां १८प्रदानं ज्ञानपूर्वकम् । एताः प्रसिद्धयो ज्ञेया अष्टादश मनीषिभिः ॥३॥**

तत्र 'भलनं' न भेतव्यं भवता तद्विषयेऽहमेव २भविष्यामीत्यादिवाक्यैश्चौर्यविषयं प्रोत्साहनम्१ । "कुशलं" मिलितानां सुखदुःखादितद्वार्ताप्रश्नः २ । "तर्जा" हस्तादिना चौर्यं प्रति प्रेषणादिसंज्ञाकरणम् ३ । "राजभोगो" राजभोगद्रव्यापह्नवः ४ । 'अवलोकनं' हरतां चौराणामुपेक्षाबुद्ध्या दर्शनम् ५ । 'अमार्गदर्शनं' चौरमार्गपृच्छकानां मार्गान्तरकथनेन तदज्ञापनम् ६ । 'शय्या' शयनीयार्पणादि । 'पदभङ्गः' पश्चाच्चतुष्पदप्रचारादिद्वारेण ८ । 'विश्रामः' स्वगृह एव वासकाद्यनुज्ञा ९ । 'पादपतनं' प्रणामादिगौरवम् १० । 'आसनं' विष्टरदानम् ११ । 'गोपनं' चौरापह्नवः १२ । 'खण्डखादनं' खण्डमण्डकादिभक्तदानम् १३ । 'महाराजिकं' लोकप्रसिद्धम् १४ । 'पद्याग्न्युदकरज्जूनां प्रदानं" इति प्रक्षालनाभ्यंगाभ्यां दूरमार्गागमनजनितश्रमापनोदित्वेन पादेभ्यो हितं पद्यमुष्णजलतैलादि तस्य दानं

१३ । पाकाद्यर्थं चाग्नेः समर्पणम् १६ । पानाद्यर्थं शीतोदकस्य १७ । चौरापहृतचतुष्पदादिबन्धनार्थं रज्जूनां च प्रदानं १८ । ज्ञानपूर्वकं चेति सर्वत्र योज्यम्, अज्ञानपूर्वकस्याऽनपराधत्वात् । 'हुंतावायपगासण' इति अशुद्धव्यवहारकृतो ये भाविनोऽपाया अनर्था राजदण्डनरकपातादयस्तेषां प्रकाशनं प्रकटनम् । भद्र ! मा कृथाः पापानि चौर्यादिनि, इहामुत्र चानर्थकारीणीति परेभ्यः प्रतिपादनमेवं प्रकारेण । तथा हि—

**अन्नाएण विढत्तं दव्वमसुद्धं असुद्धदव्वेणं । आहारोत्ति असुद्धो तेण असुद्धं सरीरंपि ॥१॥**

**देहेण असुद्धेणं जं जं किज्जइ कयावि सुहकिच्चं । तं तं न होई सहलं बीयं पित्र उसरनिहित्तं ॥२॥**

तथा "मित्तीभावो य सब्भावा" इति मित्रस्य भावः कर्म वा मैत्री, तस्या भावो भवनं निष्कपटतया । सुमित्रवन्निष्कपटमैत्रीं करोतीत्यर्थः । न तु कपटमैत्रीं दर्शयन् जनं वञ्चयति । एवं हि गोमुखव्याघ्रवृत्त्या व्यवहरन् सर्वेषामविश्वासस्थानं पापभाक् च भवेदिति ज्ञात्वा चतुर्द्धा ऋजुव्यवहारः स्याद्विवेकी । अयं च व्यवसायव्यवहारः—

**क्रयाणकेष्वदृष्टेषु न सत्यङ्कारमर्पयेत् । दद्याच्चेद्बहुभिः सार्द्धमिच्छेल्लक्ष्मीं वणिग् यदि ॥१॥**

**कुर्यात्तत्रार्थसम्बन्धमिच्छेद्यत्र न सौहृदम् । यदृच्छया न तिष्ठेच्च प्रतिष्ठाभङ्गभीरुकः ॥२॥**

**व्यापारिभिश्च विप्रैश्च सायुधैश्च वणिग्वरः । श्रियमिच्छन्न कुर्वीत व्यवहारं कदाचन ॥३॥**

**नटे पण्याङ्गनायां च द्यूतकारे विटे तथा । दद्यादुद्धारके नैव धनरक्षापरायणः ॥४॥**

**धर्मबाधाकरं यच्च यच्च स्यादयशस्करम् । भूरिलाभमपि ग्राह्यं पण्यं पुण्यार्थिभिर्न तत् ॥५॥**

**धनं यश्चार्ज्यते किंचित्कूटमानतुलादिभिः । नश्येत्तन्नैव दृश्येत तप्तपात्रेऽम्बुबिन्दुवत् ॥६॥**

**भाव्यं प्रतिभुवा नैव दाक्षिण्येन न साक्षिणा । कोशपानादिकं चैव न कर्त्तव्यं यतस्ततः ॥७॥**
**यो द्यूतधातुवादादिसम्बन्धाद्धनमीहते । स मषीकूर्चकैर्धाम धवलीकर्तुमिच्छति ।८॥**

इह प्रायो लोभाकुलिततया बह्वारम्भश्रावकानुचितद्विपदचतुष्पदलोहगुलीतिलादिकुवस्तुव्यवसाययन्त्रकर्मादिकुव्यापारधर्मकर्मव्ययसंक्षेपादिप्रकारैः क्रियमाणैर्न धनवृद्धिर्जायते, शुभकर्मोपचितधर्मानुसारित्वाचस्याः । यतः -

**यत्नानुसारिणी विद्या लक्ष्मीः पुण्यानुसारिणी । दानानुसारिणी कीर्तिर्बुद्धिः कर्मानुसारिणी ॥१॥**

अत्र धनश्रेष्ठिज्ञातम्–

काञ्चनपुरे सुन्दरश्रेष्ठिभूः धनश्रेष्ठी । ९९ लक्षधनस्वामि । ५५ लक्षाः पूर्वजक्रमागताः । ४४ लक्षास्तत्पित्राऽर्जिताः । पितरि स्वर्गते तेन श्रेष्ठिना कोटिं कर्तुमिच्छता गृहधर्मादिव्ये लक्षमेकं न्यूनं कृतं, तथाऽपि वर्षान्ते लेखके विलोकिते केषाञ्चित्क्रयाणकाणां समर्घ्यभवनादिना तावदेव धनं नाधिकमभूत् । ततो देशान्तरेषु १५ कर्मादान प्रकारैर्व्यवसायं वितन्वता समधिककोटिरप्यर्जिता । पश्चादागच्छतो मार्गे भिल्लैः सर्वं लुण्टितम् । किञ्चिदाभरणादिसारं गुप्तीकृतं तल्लात्वा गृहे समायातः । पुनर्लेखके तावदेव । ततो महालोभाकुलमनाः पल्ल्यादिप्रत्यन्तग्रामेषु चौरानीतवस्तुसमर्घ्यादानचौरप्रदानविरुद्धराज्यातिक्रमादिभिः सपादकोटिमुपार्जितवान् । क्वापि ग्रामे वह्निना सर्वं ज्वलितम् । गृहागतः स्वनिन्दापरो मित्रेण जिनदत्तेन बोधितः । हे सुहृत् मा कुव्यवसायेन द्रव्यहानिं धर्महानिं च कुरु । गृहादिव्ययमपि तावन्तमेव कुरु । ततस्तथा कृत्वा व्यवहरति एकदा कोटीध्वजवतां लक्षेश्वरैरभ्युत्थानादिप्रतिपत्तिं क्रियमाणां दृष्ट्वा "साहण–वाहण–पाहण" इति भूरिद्रव्यार्जनप्रकारत्रयं श्रुत्वा पूर्वं तुरगव्यवसायो मण्डितः । पश्चान्मित्रादिभिर्वार्यमाणोऽपि पोते चटितः । बहुकोटिमितं द्रव्यमर्जितम् । पश्चादागच्छन् भग्नपोतो लब्धफल-

कश्चोदधिमुत्तीर्य गृहमागतः। लेखके पुनः ९९ लक्षा एव। कोटिमूल्यस्य रत्नस्य जङ्घायां गुप्तीकृतस्य वपुस्तापादिनाऽल्पमूल्यभवनात्। ततः श्रान्तः पुण्यपरः समधिकगृहधर्मादिव्ययपरोऽभवत्। तथाकरणे च गृहवस्तूनां महर्घ्यतया कतिभिर्दिनैः कोटिरपि मिलिता। ततोऽनेकप्रासादजीर्णोद्धारजिनप्रतिमाप्रतिष्ठादिप्रौढपुण्योद्यतस्य कोटिः समधिकैव जायते, न तु न्यूना, "सर्वत्र वृद्धिः सृजतां सुधर्मम्" इत्युक्तेः क्रमेण सुपुत्रनिर्व्यूढगृहभारश्चारित्री जातः। दुस्तपस्तपोभिः क्षीणकर्मा केवली जातः, शिवं प्राप्तः।

एवमतिक्लेशादिपरिहारेण शुद्धव्यवहारमेवानुशीलयतः प्रायोऽर्थवृद्धिः। विभवत्वं च गार्हस्थ्ये प्रधानं कारणमित्यादौ न्यायसम्पन्नविभव इत्युक्तम्॥

इत्थं न्यायोपगतविभवः पुण्यकार्याण्यनेकान्यातन्वानो विशदविधिना प्राप्तकीर्तिप्रतिष्ठः।
लोके श्लाघापदमधिगतः शुद्धगार्हस्थ्यधर्मे योग्यः प्रोक्तो मुनिभिरुदयत्सद्विवेकिप्रवेकः ॥१॥

## आचारोपदेशः

अन्यगोत्रैः कृतोद्वाहः कुलशीलसमैः समम्। सुप्रातिवेश्मिके स्थाने कृतवेश्मान्वितः स्वकैः ॥२०॥ उपलुप्तं त्यजन् स्थानं कुर्वन्नायोचितं व्ययम्। वेषं वित्तानुसारेणाप्रवृत्तो जनगर्हिते ॥२१॥ देशाचारं चरन् धर्ममपुञ्चन्नाश्रिते हिते। बलाबलं विदन् जानन् विशेषं च हिताहितम् ॥ २२ ॥ वशीकृतेन्द्रियो देवे गुरौ च गुरुभक्तिमान्। यथावत् स्वजने दीनेऽतिथौ

१ "व्यवसायं" इत्यपि।

च प्रतिपत्तिकृत् ॥ २३ ॥ एवं विचारचातुर्यं रचयंश्चतुरैः समम् । कियतीमतिक्रमन् वेलां शृण्वन् शास्त्राणि वा भणन् ॥२४॥ कुर्वीतार्थार्जनोपायं न तिष्ठेद्दैवतत्परः । उपक्रमं विना भाग्यं पुंसां फलति न क्वचित् ॥२५॥ शुद्धेन व्यवहारेण व्यवहारं सृजेत्सदा । कूटतोल कूटमानं कूटलेख्यं च वर्जयेत् ॥२६॥ अंगारवनशकटभाटकस्फोटजीविका । दन्तलाक्षारस-केशविषवाणिज्यकानि च ॥ २७॥ यन्त्रपीडा निर्लाछनमसती पोषणं तथा । दवदानं सरःशोष इति पञ्चदश त्यजेत् ॥२८॥ लोहं मधूकपुष्पाणि मदनं माक्षिकं तथा । वाणिज्याय न गृण्हियात्कन्दान् पत्राणि वा सुधीः ॥ २९ ॥ स्थापयेत्फाल्गुना-दूर्ध्वं न तीलानतसीमपि । गुडदुष्परकादीनि जन्तुघ्नानि घनागमे ॥ ३० ॥ शकटं वा बलिवर्दान् नैव प्रावृषि वाहयेत् ॥ प्राणिहिंसाकरं प्रायः कृषिकर्म न कारयेत् ॥ ३१ ॥ विक्रीणीयात्प्राप्तमूल्यं न वान्छेदधिकाधिकम् । अतिमूल्यकृतां प्रायो मूलनाशः प्रजायते ॥ ३२ ॥ उद्धारके न प्रदद्यात्सति लाभे महत्यपि । ऋते ग्रहणकाद् व्याजे न प्रदद्याद्धनं खलु ॥३३॥ जानन् स्तेनाहृतं नैव गृण्हियाद्धर्ममर्मवित् । वर्जयेत्तत्प्रतिरूपं व्यवहारं विचारवान् ॥३४॥ तष्करैरन्त्यजैर्धूर्तैर्मलिनैः पतितैः समम् । इहामुत्रहितं वाञ्छन् व्यवहारं परित्यजेत् ॥ ३५ ॥ विक्रीणानः स्ववस्तूनि वदेत् [१]कूटक्रयं नहि । आददानोऽन्यस-क्तानि सत्यकारं न लोपयेत् ॥ २६ ॥ अदृष्टवस्तुनो नैव साटकं दृढयेद् बुधः । स्वर्णरत्नादिकं प्रायो नाददीतापरीक्षितम् ॥ ३७ ॥ राजतेजो विना न स्यादर्थापन्निवारणम् । नृपाद्यानानुसरेत्तत्पारवश्यमनाश्रयन् ॥ ३८ ॥ तपस्विनं कविं वैद्यं मर्मज्ञं भोज्यकारकम् । मान्त्रिकं निजपूज्यं च कोपयेज्जातु नो बुधः ॥ ३९ ॥ अतिक्लेशं च धर्मातिक्रमणं नीचसेवनम् ।

---

१ 'जातु' इत्यपि पाठः । २ जुठ्ठी खरीदी ।

विश्वस्तघातकरणं नाचरेदर्थतत्परः ॥ ४० ॥ आदाने च प्रदाने च न कुर्यादुक्तलोपनम् । प्रतिष्ठां महतीं याति नरः स्ववचने स्थिरः ॥४१॥ धीरः स्ववस्तुनाशेऽपि पालयेद्धि निजां गिरम् । नाशयेत्स्वल्पलाभार्थे [1]वसुवत्स्यात्स दुःखितः ॥४२॥ एवं [2]व्यवहारपरो यामं तुर्यं च यापयेत् । त्रैकालिककृते[3] गच्छेदथो मन्दिरमात्मनः ॥४३॥ एकाशनादिकं येन प्रत्याख्यानं कृतं भवेत् । आवश्यककृते सायं मुनिस्थानमसौ व्रजेत् ॥ ४४ ॥ दिवसस्याष्टमे भागे कुर्याद्वैकालिकं सुधीः । प्रदोषसमये नैव निश्ययाम्नैव कोविदः ॥ ४५ ॥ चत्वारि खलु कर्माणि सन्ध्याकाले विवर्जयेत् । आहारं मैथुनं निद्रां स्वाध्यायं च विशेषतः ॥ ४६ ॥ आहाराज्जायते व्याधिर्मैथुनान्गर्भदुष्टता । भूतपीडा निद्रया स्यात् स्वाध्यायाद् बुद्धिहीनता ॥४७॥ प्रत्याख्यानं घुचरिमं कुर्याद्वैकालिकादनु । द्विविधं त्रिविधं चापि चाहारं वर्जयेत्समम् ॥ ४८ ॥ अह्नो मुखेऽवसाने च यो द्वे द्वे घटिके त्यजेत् । निशाभोजनदोषज्ञो (विज्ञेयः) पुण्यभाजनम् ॥ ४९ ॥ करोति विरतिं धन्यो यः सदा निशि भोजनात् । सोऽर्द्धं पुरुषायुष्कस्य स्यादवश्यमुपोषितः ॥ ५० ॥ वासरे च रजन्यां च यः खादन्नेव तिष्ठति । शृंगपुच्छपरिभ्रष्टः स्पष्टं स पशुरेव हि ॥ ५१ ॥ उलूककाकमार्जारगृध्रशम्बरसूकराः । अहिवृश्चिकगोधाश्च जायन्ते रात्रिभोजनात् ॥ ५२ ॥ नैवाहुतिर्न च स्नानं न श्राद्धं देवतार्चनम् । दानं वा विहितं रात्रौ भोजनं तु विशेषतः ॥ ५३ ॥ एवं नयेद्यश्चतुरोऽपि यामान् । नयाभिरामः पुरुषो दिनस्य । नयेन युक्तो विनयेन दक्षो भवेदसावच्युतसौख्यभाग् वै ॥ ५४ ॥

॥ इति श्री रत्नसिंहसूरीश्वर शिष्य श्री चारित्र सुन्दरगणि विरचिते आचारोपदेशे तृतीयो वर्गः ॥

---

१ वसुनामक नृपवत् । २ "व्यवहार पर" इत्यपि पाठः । ३ सांजे वालु करवाने माटे ।

## ॥ अथ चतुर्थो वर्गः ॥

प्रक्षाल्य स्वल्पनीरेण पादौ हस्तौ तथा मुखम् । धन्यंमन्यः पुनः सायं पूजयेच्छ्रीजिनं मुदा ॥ १ ॥ सत्क्रियासहितं ज्ञानं जायते मोक्षसाधकम् । जानन्निति पुनः सायं कुर्यादावश्यकक्रियाम् ॥ २ ॥ क्रियैव फलदा लोके न ज्ञानं फलदं मतम् । यतः स्त्रीभक्ष्यभेदज्ञो न ज्ञानात्सुखितो भवेत् ॥ ३ ॥ गुर्वभावे निजे गेहे कुर्वीतावश्यकं सुधीः । विन्यस्य स्थापनाचार्यं नमस्कारावलीमथ ॥ ४ ॥ धर्मात्सर्वाणि कार्याणि सिद्ध्यन्तीति विदन् हृदि । सर्वदा तद्गतस्वान्तो धर्मवेलां न लंघयेत् ॥ ५ ॥ अतीतानागतं कर्म क्रियते यज्ञपादिकम् । वापिते चोषरक्षेत्रे धान्यवन्निष्फलं भवेत् ॥ ६ ॥ विधिं सम्यक् प्रयुञ्जीत कुर्वन् धर्मक्रियां सुधीः । हीनाधिकं सृजन् मन्त्रविधिं य ुःखितो भवेत् ॥ ७ ॥ धर्मानुष्ठानवैतथ्यात्प्रत्युतानर्थ संभवः । रौद्ररन्ध्रादिजनको दुःप्रयुक्तादिवौषधात् ॥ ८ ॥ वैयावृत्यकृतं श्रेयोऽक्षयं मत्वा विचक्षणः । विहितावश्यकः श्राद्धः कुर्याद्विश्रामणां गुरोः ॥९॥ वस्त्रावृतमुखा मौनी हरन् सर्वांगजं श्रमम् । गुरुं संवाहयेद्यत्नात्पादस्पर्शं त्यजन्निजम् ॥ १० ॥ ग्रामचैत्ये जिनं नत्वा ततो गच्छेत्स्वमन्दिरम् । प्रक्षालितपदः पञ्चपरमेष्ठिस्तुतिं स्मरेत् ॥११॥ अर्हतः शरणं सन्तु सिद्धाश्च शरणं मम । शरणं जिनधर्मो मे साधवः शरणं सदा ॥ १२ ॥ नमः श्रीस्थूलभद्राय कृतभद्राय तायिने । शीलसन्नाहमाधृत्य यो जिगाय स्मरं रयात् ॥ १६ ॥ गृहस्थस्यापि यस्यासीच्छीललीला बृहत्तरा । नमः सुदर्शनायास्तु सद्दर्शनकृतश्रिये ॥ १४ ॥ धन्यास्ते कृतपुण्यास्ते मुनयो जितमन्मथाः । आजन्म निरतीचारं ब्रह्मचर्यं चरन्ति ये ॥ १५ ॥

निःसत्वो भूरिकर्माहं सर्वदाप्यजितेन्द्रियः । नेकाह्मपि यः शक्तः शीलमाधातुमुत्तमम् ॥ १६ ॥ संसार ! तव निस्तारपदवी न दवीयसी । अन्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥ १७ ॥ अनृतं साहसं माया मूर्खत्वमतिलोभता । अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः ॥ १८ ॥ या रागिणि विरागिण्यः स्त्रियस्ताः कामयेत कः । सुधीस्तां कामयेन्मुक्ति या विरागिणि रागिणी ॥ १९ ॥ एवं ध्यायन् भजेन्निद्रां स्वल्पकालं समाधिमान् । भज्जेन्न मैथुनं धीमान् धर्मपर्वसु कर्हिचित् ॥ २० ॥ नातिकालं निषेवेत ममीलां धीनिधिः पुनः । अत्यादृता भवेदेषा धर्मार्थसुखनाशिनी ॥ २१ ॥ अल्पाहारा अल्पनिद्रा अल्पारम्भपरिग्रहाः । भवन्त्यल्पकषाया ये ज्ञेयास्तेऽल्पभवभ्रमाः ॥ २२ ॥ निद्राहारभयस्नेहलज्जाकामकलिक्रुधः । यावन्मात्रा विधीयन्ते तावन्मात्रा भवन्त्यमी ॥ २३ ॥ विघ्नव्रातलता नेमिं श्रीनेमिं मनसि स्मरन् । स्वापकाले नरो नैव दुःस्वप्नैः परिभूयते ॥ २४ ॥ अश्वसेनावनीपालवामादेवीतनूरुहम् । श्रीपार्श्वं संस्मरन् नित्यं दुःस्पनं नैष पश्यति ॥ २५ ॥ श्रीलक्ष्मणांगसंभूतं महसेननृपाङ्गजम् । चन्द्रप्रभं स्मरन् चित्ते सुखनिद्रां लभेरसौ ॥ २६ ॥ सर्वविघ्नाहिगरुडं सर्वसिद्धिकरं परम् । ध्यायन् शान्तिजिनं नैति चौरादिभ्यो भयं नरः ॥ २७ ॥ इत्यवेत्य दिनकृत्यमशेषं श्राद्धवर्गजनितोत्ततोषम् । यच्चरन्निह परत्र च लोके कीर्तिमेति पुरुषो धुतदोषम् ॥ २८ ॥

॥ इति श्री रत्नसिंहसूरीश्वरशिष्य श्रीचारित्रसुन्दरगणिविरचिते आचारोपदेशे चतुर्थो वर्गः ॥

## ॥ पञ्चमवर्गः ॥

लब्ध्वैतन्मानुषं जन्म सारं सर्वेषु जन्मसु । सुकृतेन सदा कुर्यात्सकलं सफलं सुधीः ॥ १ ॥ निरन्तरकृताद्धर्मात्सुखं नित्यं भवेदिति । अवन्ध्यं दिवसं कुर्याद्दानध्यानतपःश्रुतैः ॥ २ ॥ आयुषस्तृतीये भागे जीवोऽन्त्यसमयेऽथवा । आयु शुभाशुभं प्रायो बध्नाति परजन्मनः ॥ ३ ॥ आयुस्तृतीयभागस्थः पर्वघस्रेषु पञ्चसु । श्रेयः समाचरन् जन्तुर्बध्नात्यायुर्निजं ध्रुवम् ॥ ४ ॥ जन्तुराराधयेद्धर्मं द्विविधं द्वितीयादिने । सृजन सुकृतसंघातं रागद्वेषद्वयं जयेत् ॥ ५ ॥ पञ्चज्ञानानि लभते चारित्राणि व्रतानि च । पञ्चमीं पालयन् पञ्च प्रमादान् जयति ध्रुवम् ॥ ६ ॥ दुष्टाष्टकर्म नाशायाष्टमी भवति रक्षिता । स्यात्प्रवचनमातृणां शुद्धयेऽष्टमदान् जयेत् ॥ ७ ॥ एकादशांगानि सुधीराराधयति निश्चितम् । एकादश्यां शुभं तन्वन् श्रावकप्रतिमास्तथा ॥ ८ ॥ चतुर्दशरज्जूपरिवासमासादयत्यहो । चतुर्दश्यामाराधयन्पूर्वाणि च चतुर्दश ॥ ९ ॥ एकैकोच्चफलानि स्युः पञ्चपर्वाण्यमूनि वै । तदत्र विहितं श्रेयोऽधिकाधिकफलं भवेत् ॥ १० ॥ धर्मक्रियां प्रकुर्वीत विशेषात्पर्ववासरे । आराधयन्नुत्तरगुणान् वर्जयेत्स्नानमैथुने ॥ ११ ॥ विदध्यात्पौषधं धीमान् मुक्तिवश्यौषधं परम् । तदशक्तौ विशेषेण श्रयेत्सामायिकव्रतम् ॥ १२ ॥ च्यवनं जननं दीक्षा ज्ञानं निर्वाणमित्यहो । अर्हतां कल्याणकानि सुधीराराधयेत्तथा ॥ १३ ॥ एकस्मिन्नैकाशनकं द्वयोर्निर्विकृतेस्तपः । त्रिष्वाचामलं सपूर्वार्द्धे चतुर्षूपोषितं सृजेत् ॥ १४ ॥ सपूर्वार्द्धमुपवासं पुनः पञ्चसु तेष्विति । पञ्चभिर्वत्सरैः कुर्यात्तानि चोपोषितैः सुधीः ॥ १५ ॥ अर्हदादिपदस्थानि विंशतिस्थानकानि च । कुर्वीत विधिना

धन्यस्तपसैकाशनादिना ॥१६॥ ततो विधिध्यानपरो योऽमून्याराधयत्यहो । लभते तीर्थकृन्नामकर्माशर्महरं परम् ॥ १७ ॥
उपवासेन यः शुक्लामाराधयति पञ्चमीम् । सार्द्धानि पञ्चवर्षाणि स लभेत्पञ्चमीं गतिम् ॥ १८ ॥ उद्यापनं व्रते पूर्णे कुर्याद्वा
द्विगुणं व्रतम् । तद्योदिनप्रमाणानि भोजयेन्मानुषाणि च ॥ १९ ॥ कारयेत्पञ्च पञ्चोच्चैर्ज्ञानोपकरणानि च । पञ्चम्युद्यापने
तद्वच्चैत्योपकरणान्यपि ॥२०॥ पाक्षिकावश्यकं तन्वन् चतुर्दश्यामुपोषितम् । पक्षं विशुद्धं तनुते द्विधापि श्रावको निजम् ॥२१॥
त्रिषु चतुर्मासिकेषु कुर्यात् षष्ठं तपः सुधीः । ज्येष्टपर्वण्यष्टमं च तदावश्यकयुक् सृजेत् ॥ २२ ॥ अष्टाह्निकासु सर्वासु विशे-
षात्पर्ववासरे । आरंभान् वर्जयेत् देहे खण्डनोत्पेषणादिकान् ॥२३॥ पर्वणि शृणुयाज्ज्येष्ठे श्रीकल्पं स्वच्छमानसः । शासनो-
त्सर्पणां कुर्वन्नमारिं कारयेत्पुरे ॥ २४ ॥ श्राद्धो विधाय सद्धर्मकर्म नो निर्वृतिं व्रजेत् । अतृप्तमानसः कुर्याद्धर्मकर्माणि
नित्यशः ॥ २५ ॥ ज्येष्ठे पर्वणि श्रीकल्पं सावधानं शृणोति यः । अन्तर्भवाष्टकं धन्यं स लभेत्परमं पदम् ॥ २६ ॥ सम्य-
क्त्वसेवनान्नित्यं सद्ब्रह्मव्रतपालनात् । यत्पुण्यं जायते लोके श्रीकल्पश्रवणेन तत् ॥ २७ । दानैस्तपोभिर्विविधैः सत्तीर्थोपा-
सनैरहो । यत्पापं क्षीयते जन्तोस्तत्कल्पश्रवणेन वै ॥ २८ ॥ मुक्तेः परं पदं नास्ति तीर्थं शत्रुञ्जयात्परम् । सद्दर्शनात्परं
तत्त्वं शास्त्रं कल्पात्परं न हि ॥ २९ ॥ अमावास्याप्रतिपदोर्दीपोत्सवदिनस्थयोः । प्राप्तनिर्वाणसद्ज्ञानौ स्मरेच्छ्रीवीरगौतमौ
॥३०॥ उपवासद्वयं कृत्वा गौतमं दीपपर्वणि । यः स्मरेत्स लभेन्नूनमिहामुत्र महोदयम् ॥ ३१ ॥ स्वगृहे ग्रामचैत्ये च
विधिनार्चा जिनेशितुः । कृत्वा मङ्गलदीपं चाश्नीयात्सार्द्धं स्वबन्धुभिः ॥ ३२ ॥ कल्याणकं जिनानां हि परमे दिनपंचके
निजशक्त्या सदार्थिभ्यो दद्याद्दानं यथोचितम् ॥ ३३ ॥ इत्थं सुपर्वविहितोत्तमकृत्यवार्ता—चारप्रचारविहिताश्रववर्गमार्गः ।

श्राद्धः समृद्धविधिवर्द्धितशुद्धबुद्धि-र्भुक्त्वा सुपर्वसुखमेति च मुक्तिसौख्यम् ॥ ३४ ॥

॥ इति श्रीरत्नसिंहसूरीश्वरशिष्य श्रीचारित्रसुन्दरगणिविरचिते आचारोपदेशे पञ्चमो वर्गः ॥

## ॥ षष्ट वर्गः ॥

श्राद्धो त्रिधायः सद्धर्मं कमतो निर्वृतिं व्रजेत् । अतृप्तमानसः कुर्याद्धर्मकर्माणि नित्यशः ॥१॥ धर्मादधिगतैश्वियों धर्ममेव निहन्ति यः । कथं शुभायतिर्भावी स्वस्वामिद्रोहपातकी ॥ २ ॥ दानशीलतपोभावभेदैर्धर्मश्चतुर्विधः । आराध्यः सुधिया शश्वद्भुक्तिमुक्तिफलप्रदः ॥ ३ ॥ देयं स्तोकादपि स्तोकं न व्यपेक्षो महोदयः । इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥ ४ ॥ ज्ञानवान् ज्ञानदानेन, निर्भयोऽभयदानतः । अन्नदानात्सुखी नित्यं निर्व्याधिर्भेषजाद्भवेत् ॥५॥ कीर्तिः संजायते पुण्यान्न दानाद्यच्च कीर्तये । कैश्चिद्वितीयंते दानं ज्ञेयं तद् व्यसनं बुद्धैः ॥ ६ ॥ दातुर्दानमपापाय ज्ञानिनां न प्रतिग्रहः । त्रिषशीतापहौ मन्त्रवन्हो किं दोषभाजिनौ ॥ ७ ॥ व्याजे स्याद् द्विगुणं वित्तं व्यसाये चतुर्गुणम् । क्षेत्रे शतगुणं प्रोक्तं पात्रेऽनन्तगुणं भवेत् ॥ ८ ॥ चैत्यप्रतिमापुस्तक श्रीसंघभेदरूपेषु । क्षेत्रेषु सप्तसु धनं वपेद् भूरिफलाप्तये ॥ ९ ॥ चैत्यं यः कारयेद्धन्यो जिनानां भक्तिभावितः । तत्परमाणुसंख्यानि पल्यान्येष सुरो भवेत् ॥ १० ॥ यत्कारितं चैत्यगृहं तिष्ठेद्यावदनेहसम् । स तत्समयसंख्यानि वर्षाणि त्रिदशो भवेत ॥ ११ ॥ सुवर्णरूप्यरत्नमयीं दृषल्लेपमयीनपि । कारये-द्योऽर्हतां मूर्तिं स वै तीर्थंकरो भवेद् ॥ १२ ॥ अंगुष्ठमात्रामापि यः प्रतिमां परमेष्ठिनः । कारयेदाप्य शक्रत्वं स लमेत्परमं

पदम् ॥१३॥ धर्मद्रुमूलं सच्छास्त्रं जानन् मोक्षफलप्रदम् । लेखयेद्वाचयेद्यच्च[1] शृणुयाद्भावशुद्धिकृत् ॥ १४ ॥ लेखयित्वा च शास्त्राणि यो गुणिभ्यः प्रयच्छति । तन्मात्राक्षरसंख्यानि वर्षाणि त्रिदशो भवेत् ॥१५॥ ज्ञानभक्तिं विधत्ते यो ज्ञानविज्ञान-शोभितः । प्राप्नोति स नरः प्रान्ते केवलिपदमव्ययम् ॥१६॥ [2]निदानं सर्वसौख्यानामन्नदानं विभावयन् । साधर्मिकाणां वात्सल्यं कुर्याच्छक्त्या स मां प्रति ॥ १७ ॥ वात्सल्यं बन्धुमुख्यानां संसारार्णवमज्जनम् । तदेव समधर्माणां संसारोदधि-तारकम् ॥ १८ ॥ प्रतिवर्षं संघपूजां शक्त्या कुर्याद्विवेकवान् । प्रासुकानि श्रीगुरुभ्यो दद्याद्वस्त्राणि भक्तितः ॥ १९ ॥ वसत्यशनपानानि पात्रवस्त्रौषधानि च । चेन्न पर्याप्तविभवो दद्यात्तदपि शक्तितः ॥ २० ॥ सत्पात्रे दीयते दानं दीयमानं न हीयते । कूपारामगवादीनां ददतामेव सम्पदः ॥ २१ ॥ प्रदत्तस्य च भुक्तस्य[2] दृश्यते महदन्तरम् । प्रभुक्तं जायते वर्चो दत्तं भवति चाक्षयम् ॥ २२ ॥ आयासशतलब्धस्य प्राणेभ्योऽपि गरीयसः । दानमेवैक वित्तस्य गतिरन्या विपत्तयः ॥ २३ ॥ क्षेत्रेषु सप्तसु वपन् न्यायोपात्तं निजं धनम् । साफल्यं कुरुते श्राद्धो निजयोर्धनजन्मनोः ॥२४॥

॥ इति श्रीरत्नसिंहसूरीश्वरशिष्यश्रीचारित्रगणिविरचिते आचारोपदेशे षष्ठो वर्गः ॥

## आचार्यश्री विजयहर्षसूरीश्वर–लघुजीवनप्रभा ।

एतस्यामार्यभूमौमरुधरविषये थांवलाख्ये प्रसिद्धे । ग्रामे धर्मे जिनोक्ते ह्यचलजिवणिजो दत्तचित्ताः पवित्राः ॥ आसं-

---

१ 'यत्तु' पाठः । सम्यक् । २ 'निधानं' इत्यपि पाठः ।

स्तद्धर्मपत्नी विनयगुणयुता स्वामिसंपर्गसौम्या । भूरीदेवीतिनाम्नाऽभवदतिसरला जैनधर्मप्रवीणा ॥१॥ क्ष्मावेदाङ्केन्दुमाने (१९४१) धवलदलयुते फाल्गुने बाणतिथ्याम् । मासेऽब्दे वैक्रमाख्ये सुषुव इति सुतं गुर्विणी भूरिदेवी ॥ तत्सुनो नामधेयं मृदु विमलतनो नामसंस्कारकाले । पित्रा शुद्धे मुहूर्ते निजकुलविधिना कारितं हुकुमिचंदः ॥२॥ बालोऽथवै शैशवशालिनीं सः । सदा वयस्यैर्मिलितोऽपि लीलाम् ॥ प्राग्जन्मसंस्कारबलेन मुक्त्वा-ऽभवत्सुविद्याध्ययनप्रसक्तः ॥ ३ ॥ सद्विद्या समधित्य लौकिकगुरोः पार्श्वे स वैराग्यभाक् । पित्रादिर्प्रतिबोधितोऽपि सततं धर्मैकध्याने रतः ॥ गार्हस्थ्यारुचिको मुनीश्वरसमःसद्-भावनां ध्यायति । श्रीमद्भागवती भवोदधितरी दीक्षाकदोदेष्यति ॥ ४ ॥ ध्यात्वेति श्राद्धवर्यः शमरसजलधिं शोधयन् सौम्यमूर्ति-मज्ञानध्वान्तभानुं गुरुममलहृदं गौर्जरीं भूमिमाप ॥ "दाहोदग्राममध्ये कतिपयदिवसैश्चागतो हुकुमिचंदः । आचार्यो नीतिसूरि[1]न् मुनिगणसहितांस्तत्र दृष्ट्वा जहर्ष ॥५॥ सूरीश्वरं तं विधिनर्षियुक्तं । प्रदक्षिणीकृत्य प्रणम्य चोचे ॥ मां हे कृपालो भववार्धिमध्या-द्दीक्षां प्रदायाशु समुद्धर त्वं ॥६॥ नागेष्वङ्केन्दु (१९५८) वर्षे विमलदलयुते फाल्गुने स्कन्द-तिथ्याम् । ग्रामे दाहोद नाम्नि प्रथमवयसि वै हुक्मिचंदोऽयमेव ॥ आचार्याणां समीपे गुरुभिरथसमं नीतिसूरीश्वराणा-मङ्गीकृत्य शु दीक्षां व्यहरदिति ततोऽन्यत्र कल्पो मुनीनाम् ॥७॥ प्राप्तविद्योऽतिगंभीरः श्रीहर्षविजयो मुनिः ॥ राधनपुरमायात-विहरन् गुरुभिः समम् ॥ ८ ॥ व्योमर्ष्यङ्कहिमांशु (१९७०) वर्षकमिते मार्गेसिते वै दले । मासेविश्वतिथौ च राधनपुरे श्री सद्गुरोः सन्निधौ ॥ तत्रैवाथमुनीश्वरो गणिपदं राकातिथौ प्राप्तवान् । पन्न्यासास्पपदभूषितोऽभवदपि प्रौढप्रतापो मुनिः ॥ ९ ॥ वर्षेष्टनागनिधि चन्द्रमिते फलोद्यां । षष्ठ्यां तिथौ सितदले शुभशुक्रमासे ॥ श्री नीतिसूरिसुगुरोः कृपया नगर्यां ।

[1] सं. १९५८ मां गणिपदेहता ।

सूरीश्वरास्पदमथर्षिरलञ्चकार: ॥ १० ॥ बृहस्पतिसमं ज्ञाने राकेन्दुमिवनिर्मलम् । प्रतापे भानुतुल्यं तं क्षमायां पृथिवीनीभम् ॥ ११ ॥ समुद्रमिव गांभीर्ये, दयामूर्तिं तपस्विनम् ॥ सत्यधर्मोपदेष्टारं । भवसागरतारकम् ॥ १२ ॥ विजयहर्षसूरीशं, षट्त्रिं शद्गुणसंयुतम् ॥ श्रीमन्महेन्द्रसूरीशः शान्तो ज्ञानतपोनिधिः ॥ १३ ॥ शास्त्रपारंगतः सौम्यः, कल्याणसूरिपुङ्गवः ॥ पन्न्यासपदसंमान्यो, मङ्गलविजयो गणिः ॥१४॥ सुमतिःपूर्णानन्दो जिनेन्द्र[1]विजयस्तथा एषा शिष्यावलिर्भक्त्या मुहुः स्तौति-सदा गुरुम् ॥ १५ ॥ बाणेन्दुखाक्षिमित ( २०१५ ) वैक्रमवत्सरेतृ-तीयादिने गुरुवराय तपस्यमासे ॥ शुक्ले जिनेन्द्रविजयेन कृतार्पिता च । श्री हर्षसूरिसुगुरोर्लघु जीवनाभा ॥ १६ ॥

## ॥ जगद्गुरु भट्टारक श्री हीरविजयसूरीश्वर संक्षिप्त जीवनचरितम् ॥

महज्जगत्तापनिरासहेतुं, परोपकारार्थधृतावतारम् । श्रीनीतिसूरीश्वरपूज्यपादं, नमामि वागबुद्धिविवर्धनार्थम् ॥१॥ प्रारंभः— वैराग्यपूर्णहृदयाः त्यक्तमूर्छा जगृहुश्च चारित्रम् ॥ सुविहितसाधुप्रभवः श्री हीरविजयसूरीन्द्राः ॥२॥ अस्तिश्री गुर्जरदेशे तारंगगिरि नामकं । तीर्थं तस्याधित्यकायां कैलाशशिखरोन्नतम् ॥३॥ शृङ्गं कोटिशीलानाम मुनिमोक्षप्रदायकम् । नागेन्द्रैस्सेवितस्तत्र भुक्तिमुक्तिप्रदायकः ॥४॥ शंखेश्वरःपार्श्वनाथो भगवान् राजते स्वयम् । तं समानर्चतुः पूर्वं नमिविनमिकिन्नरौ ॥ ५ ॥ ततस्तां प्रतिमामिन्द्रः स्वर्गे सम्पूज्य शाश्वत् । गिरनारगिरेः कुटे स्थापयामास तां तदा ॥ ६ ॥ सूर्याचन्द्रमसौ तस्मात् स्थानान्नीत्वा स्वधामनि । समानर्च्यं गिरेः कुटे स्थापनां चक्रतुः पुनः ॥ ७ ॥ तत्रता धरणेन्द्रो हि समानीतः

---

[1] श्री पूज्य विजय जिनेन्द्रसूरि—धनारीवाला

स्वधामनि । ततः श्रीनेमिवचनात् श्री कृष्णः स्वयमेव हि ॥ ८ ॥ समानीनाय तां मूर्त्तिं खंभाते सुमनोहरे । नगरे राजते मूर्तिः पार्श्वनाथस्य मञ्जुला ॥ ९ ॥ ईदृक् पुण्यप्रदे देशे गुर्जरेऽतिमनोहरा । प्रह्लादनपुरी नाम्नी नगरी वर्तते शुभा ॥१०॥ तत्रौसवालसंभूतः कुरासाहाख्य श्रेष्ठिकः । आसीत् भार्या तस्य नाथी नाम्नी कील पतिव्रता ॥ ११ ॥ अधिकाशीतिके पञ्चदशे हि शतके सं. १५८३ खलु। मार्गशुक्लनवम्यां तु कुञ्जर स्वप्न सूचितम् ॥१२॥ हीरं कुमारं सुषुवे नाथी भूमिविभूषणम् । क्रमेणवर्द्धमानोऽसौ कुमारो युवकोऽभवत् ॥ १३ ॥ एकदा स कुमारो वि-जयदानमुखाच्छ्रुतम् । सन्ध्यारागमिव प्राणा-श्चंचलाश्शीघ्रगामुकाः ॥ १४ ॥ नदीवेगमिवास्थैर्यम् यौवनं खलु प्राणिनाम् । विद्युद्वच्च चलालक्ष्मीः क्षणादेव विनश्यति ॥ १५ ॥ अतः सर्वास्ववस्थासु नरैश्च हितमिच्छुभिः । जीवरक्षामयःकार्यो धर्मो जिनेन्द्रभाषितः ॥ १६ ॥ आसाद्यते भवाम्भोधौ भ्रमद्भिर्यत्कथंचन । मूढैस्तत्प्राप्य मानुष्यं हारयध्वं मुधैव मा ॥१७॥ श्रुत्वोपदेशमेतादृग् हीरः प्रमुदितो गृहम् । जगाम पश्चात् पितरौ क्रमेण स्वर्गतिं ययौ ॥१८॥ ततः कुमारो दीक्षार्थं विमला भगिनीस्वकाम् । निदेशायाऽर्थयत् भ्रातुः श्रुत्वेदं वचनं हि सा ॥ १९ ॥ नायं कालो हि दीक्षायाः भ्रातः किं त्वं प्रभाषसे । परिणीय नितम्बिन्या सह रंस्व चिरं-सुखम् ॥२०॥ वार्धक्ये वयसि प्राप्ते यदीच्छा वर्तते तव । दीक्षितस्सन् गृहं त्यक्त्वा गमिष्यसि यथासुखम् ॥ २१ ॥ तदाकर्ण्य कुमारोऽसौ भगिनिं प्रत्युवाच च ॥२२॥ दर्भाग्रभागस्थितवारिबिन्दु, समं चलं जीवनमित्यवेहि । लक्ष्मी चला वै कुलटाऽङ्गनेव, नाटयस्य पात्रेव जनस्य प्रीतिः ॥२३॥ एवं बहुविधोपायैः स्वजनाननुज्ञाप्य च । दीक्षायै प्राप्य चाज्ञां भगि-न्याः सुखपूर्वकम् ॥२४॥ षण्णवत्याधिके पञ्चदशे हि शतके खलु । ऊर्जे कृष्णे द्वितीयायां गुरुवारे शुभग्रहे ॥२५॥ गुरुणा

दीक्षितो हीरो हीरहर्षेति नामकः । अभूल्लोके सुविख्यातः शान्तिं च परमाययौ ॥ २६ ॥ गुरुणैव ततो जैनधर्मशास्त्रं च दर्शनम् । सर्वं चाधीतवान् सम्यग् भक्तियुक्तेन चेतसा ॥ २७ ॥ यत्र देशे हि माणिक्यनाथाख्य ऋषभःस्वयम् । विराजते पार्श्वदेवाऽन्तरिक्षश्च सदैव हि ॥ २८ ॥ योऽन्तरिक्षः पार्श्वदेवः कल्याणाय शरीरीणाम् । वसुन्धरातोऽतीवोच्चैः स्थाने चैव विराजते ॥२९॥ तथा कर्हेटकग्रामे सर्वसामर्थ्यवान् किलः । कर्हेटकपार्श्वनाथः स्वामी चैव विराजते ॥३०॥ अस्मिन्नैव जनपदे सोपारकपुरे खलु । आदीश्वरप्रभो जीवत्–स्वामिनः प्रतिमाऽस्ति च ॥ ३१ ॥ अत्र देशे देवगिरि पुरस्थात् कस्यचिद् द्विजात् । अधीत्य तर्कशास्त्रादिन् हीरोऽभ्यगात् गुरोः कुलम् ॥३२॥ गुरुः प्रमुदितो भूत्वा श्रीहीरं विदुषांवरम् । उपाध्यायपदेनाथ समानयत सत्वरम् ॥ ३३ ॥ दशाधिके षोडशेऽब्दे शतके च ततः खलु । पौषशुक्ले हि पञ्चम्यां हीरं सूरिपदं ह्यदात् ॥३४॥ सूरेः पदे प्रतिष्ठाप्य मुनिं हीरं बुधोत्तमम् । गुरुः विहारं कृतवान् देशदेशान्तरे ततः ॥३५॥ एकदा अकबरो भूपः सभायां बहुपण्डितान् आहूय प्रश्नं कृतवान् सुधर्मविषये खलु ॥ ३६ ॥ ततो वै पण्डितास्सर्वे स्वस्वधर्मस्य-वर्णनम् । निजबुध्या समालोच्य कृतवान् बुधसंसदि ॥३७॥ सम्राट्सभायां तत्रैकः पण्डितः किल शास्त्रवित् । सर्वशास्त्रप्रवक्तारं हीरसूरिं प्रशंसवान् ॥३८॥ राजन् यथा त्वं भूपेषु सर्वेषु मुकुटोऽसि च । तथा सर्वेषु प्राज्ञेषु हीरोऽपि मुकुटायितः ॥२९॥ श्रुत्वा वाक्यं पण्डितस्य सार्वभौमो ह्यकबरः । आह्वानाथ हीरसूरे राज्ञापत्रं विलिख्य च ॥ ४० ॥ प्रेषयामास दूतौ द्वौ अविलम्बितमेवहि । लाटदेशस्य गान्धारं नगरं प्राप्य तौ तदा ॥ ४१ ॥ श्रीहीरसूरेः सेवायाम् आज्ञापत्रं ददौ किल । दूताननाच्च विज्ञप्तिं श्रुत्वा सर्वेऽपि श्रावकाः ॥ ४२ ॥ गुरुमूचुः सविनयं भक्तियुक्तेन चेतसा । यथा केशीगणधरः प्रदेशीम्

प्रतिबोधितम् ॥ ४३ ॥ तथा भवानपि गुरो ! सम्राजं प्रतिबोधय । यथाचार्यो हेमचन्द्रः कुमारं प्रतिबोधितम् ॥ ४४ ॥ तथाऽकबरसम्राजं ज्ञानं देहि जगद्गुरो । महात्मानां विभूतिर्हि विश्वोपकृतये खलु ॥ ४५ ॥ एतादृशं वचः श्रुत्वा श्रीसंघस्य मनोरमम् । श्रीहीरसूरिस्त्वरया विहारं कृतवान् ततः ॥४६ ॥ यदा च राजनगराभ्यास ( अमदावाद ) मापज्जगद्गुरुः । श्रुत्वा चागमनं तस्य साहिबूखानः पुरेश्वरः ॥४७॥ हस्तिवाजिरथैरश्वारोहैः सैन्यैश्च पुष्पकलैः । प्रत्यानेतु गुरुं भक्तियुक्तेन पुरतो ययौ ॥ ४८ ॥ गत्वा समीपं प्राञ्जलिना प्रार्थना कृतवानिदम् । स्वामिन्नकबराज्ञप्तो द्रव्याश्वरथकुञ्जरान् ॥ ४९ ॥ उपायनं करोम्यत्र स्वीकृत्य माम् कृतार्थय । निशम्य साहिबखानस्य वचो हि मुनिपुङ्गवः ॥ ५० ॥ निष्परिग्रहवाश्चाह मतो नाङ्गिकरोमि वै । इत्युक्तः प्रस्थितो हीरो गिरिमाबु प्रति खलु ॥५१॥ तत्र श्वेतो यत्नेन निर्मितं सुमनोहरम् । श्वेताश्वगजसंयुक्तं जिनचैत्यं ददर्श हि ॥ ५२ ॥ ततः सूरीश्वरो वस्तुपालेन च विनिर्मितम् । रुचिरं चैत्यमागत्य नेमिनाथं ददर्श हि ॥ ५३ ॥ तत्रतो विहरन् मार्गेऽचलं दुर्गमवाप्तवान् । चतुर्वदनमृषभस्वामिनं तत्र वन्दितम् ॥ ५४ ॥ पश्चाद्राणकपुरं समागत्य यतीश्वरः । कारितं धनाशाहेन चैत्यं वन्दे सभक्तिकम् ॥ ५५ ॥ तस्मिन् चैत्ये चतुर्मूर्तिधरं युगादिदेवकम् । फलवर्धिपार्श्वनाथं मेडतानगरे स्थितम् ॥ ५६ ॥ उभौ बिंबो च वन्दित्वा विहारं कृतवास्ततः । फतेहपुर सकाशमागत्य-विश्रमं व्यधात् ॥ ५७ ॥ थानसिंहाभिधस्तत्र राजराजस्य सेवकः । यः प्रत्यहं श्रीफलं च सम्राजे ह्यर्पयन्नृपः ॥ ५८ ॥ सूरीश्वरस्यागमनं सम्राजेऽकबराय च । न्यषेदयत श्रीसंघः थानसिंहश्च सत्वरम् ॥ ५९ ॥ ततोः नृपाज्ञया संघं सैन्यवाद्या-दिभिस्सह । शाखापुर्यां राजधान्यां सूरिं प्रावेशयन्मुदा ॥ ६० ॥ सार्वभौमगुरुः शेखः सर्वशास्त्र विचक्षणः । सूरिमानाय-

यामास स्वगृहं भक्तिपूर्वकम् ॥ ६१ ॥ शेखेन सह धर्मस्य वार्तां कृत्वा यतीश्वरः । निखलं संशयं तस्य चोन्मुमोच मुनीश्वरः ॥ ६२ ॥ ततः सूरिः सार्वभौमनिकटं चागमत्खलु । सम्राट् विनययुक्तः सन् नाना प्रश्नान् चकार स ॥६३ ॥ तेषां प्रत्युत्तरं दत्वा जिनधर्मस्य लक्षणम् । सम्यक् च बोधयामास शास्त्रदृष्टया यतीश्वरः ॥ ६४ ॥ गुरोर्वाक्यामृतं पित्वा साम्राटकब रस्तदा । दयाधर्माद्रहृदयः अतीव च ननन्द सः ॥६५॥ भूयस्ततः सार्वभौमः सूरिं प्रत्याहसादरम् । गुरो निजाङ्घ्रिकमलात् पूतयस्व नृपासनम् ॥ ६६ ॥ सूरिस्ततः प्राह नृपं जिनधर्ममनुसरन् । राजन् कदाचित् तदधः भवेयुः कीटजन्तवः ॥ ६७ ॥ विना अवलोकनं नैव पादं दातुं समुत्सहे । तन्निशम्य गुरोर्वाक्यं प्रशशंस नृपो बहु ॥ ६८ ॥ एवं धर्मरहस्यं हि बोधयित्वा नृपं गुरुः । समागच्छत्पुरीं रम्यां आगरां विहरन् ततः ॥ ६९ ॥ चातुर्मासं व्यतीयाय तत्रैव मुनिपुङ्गवः । चिन्तामणेः पार्श्वनाथप्रतिमां तत्र वै गुरुः ॥ ७० ॥ स्थापयामास विधिवन् महारम्भोत्सवादिभिः । चातुर्मासोत्तरं सूरिः फतेहपुरमागतः ॥ ७१ ॥ सूरेरागमनं श्रुत्वा सम्राडकबरस्तदा । द्रव्याश्वरथहस्त्याद्या उपदाश्चरणे न्यधात् ॥ ७२ ॥ नाङ्गिचकार सूरिस्ताः नृपः प्राह मुनिं पुनः । मत्तः किंयत् गृहित्वा मां कृतार्थय यतीश्वर ॥ ७३ ॥ एवं मुहुर्मुहु भूपः प्रार्थनां कृतवान् मुनिं । ततोऽब्रवीन्मुनिश्रेष्ठः सार्वभौममिदंवचः ॥ ७४ ॥ यदीच्छा वर्तते राजन मां दातुं किंचिदप्यथ । पिञ्जरस्थाश्च ये सन्ति पक्षिणस्तान् हि मोचय ॥७५॥ सूरेरनुज्ञामधिगम्य राजा उन्मोचितः सर्वविहंगमान् हि । पर्यूषणस्थे च दिने ह्यहिंसा सम्पालनार्थं च ददौ निदेशम् ।७६॥ षड्गव्युत्यामभिव्याप्ते डामराख्ये सरोवरे । मीनादि सर्वजन्तुनामवधार्थं निदेशितः ॥ ७७ ॥ ततः पुनः प्राह नृपः सूरिं विनयसंयुतः । अद्यप्रभृत्यहमपि भवन्तमिव सर्वदा ॥७८॥ मृगयादि

||८२||

जीवहिंसां न करिष्यामिम्यहं खलु । इयमेव ममेच्छास्ति निर्भयाः सर्वजन्तवः । विचरन्तु यथासौख्यं क्रीडन्तु च समन्ततः
|| ७९ || मृगया जजिया शत्रुञ्जयाख्या ये करा अभूत् । स तानुन्मोचयामास सूर्याज्ञामधिगम्य च ||८०|| एवं नाना
धर्मकार्ये नृपं संयोज्य सुरिराट् । प्रचक्रमे विहारं च देशेऽन्यस्मिंस्ततः क्रमात् || ८१ । तदा सम्राडकबरः हीरसुरीश्वरं
मुनिम् । जगद गुरुरिदं पूज्यं उपाधिं प्रददे किल || ८२ || एवं बहुविधान् देशान् विहृत्य श्रीजगद्गुरुः । आजगाम पुरीं
रम्याम् मथुराख्यां क्रमेण हि || ८३ || तत्र श्रीसंघसहितो महदुत्सव संयुतः । पार्श्वनाथ प्रभो र्यात्रां चक्रे चारणवत्तथा
||८४|| श्री जम्बुप्रभावादीनां मुनीनाम् शान्तचेतसाम् । सप्तविंशतिपञ्चशतस्तूपान् वन्दे च भावतः ||८५|| ततो गोपालगोत्रस्थ
आदीशं ऋषभेश्वरम् । पश्चाशद् द्विरदाकारं ववन्दे श्रीयतीश्वरः || ८६ || तत्रतो वरकाणाख्यां पुरीं चागत्य सुरीराट् ।
वरकाणकनामानं पार्श्वनाथं नतिं व्यधात् || ८७ || पश्चात् कृत्वा विहारं च सिद्धाचलमुपेत्य च । दर्शनं नमनं कृत्वा
विजहार गुरुः पुनः || ८८ || एवं विहारं कुर्वाणः पुरमजयमागतः । एकदा स गुरुवरः पार्श्वनाथाऽजयस्य च ||८९||
चरित्रं भावयामास श्रीसंघनिकटे हीदम् । कश्चित् श्रेष्ठी सिन्धुमथा व्यापारार्थं जगाम च || ९० || दैवयोगादकस्माद्धि
दृष्ट्युत्पातमभूत् बहु । निजनौकास्थ लोकानां संहारः संप्रति ध्रुवम् || ९१ || यदैवं चिन्तयन् श्रेष्ठी मग्नः शोकार्णवेऽभवत् ।
तदैव पद्मावत्या देव्या आकाशगीरभूत् ||९२|| अस्मिन्नब्ध्यन्तरे श्रेष्ठिन् दुःखसागरमन्थिकाम् । श्रीपार्श्वनाथ प्रतिमामस्ति
तां निजनाविकैः ||९३|| उद्धारयित्वा चानर्च्य नावि संस्थाप्य यत्नतः कल्पद्रुपर्णपिटके स्थितां तां प्रतिमां पुनः । ||९४||
तटस्थद्विपमानीय दिग्जयायागतः खलु । भूयं चाजयनामानं दद्यात्तं पिटकं तदा ||९५|| त्रिभिर्विशेषकं मूर्तेरस्याः स्नात्रकेन

(कं-जलं) राजा रोगात् विमुच्यते। करिष्यसि यदैवं त्वं सर्वान् विघ्नान् विनाशये ॥९६॥ एवं देव्याः वचः श्रुत्वा नाविकेन निजेन सः। निस्सारयित्वा पिटकं नावि संस्थापितश्च तां ॥ ९७ ॥ तदैवोपद्रवास्सर्वे विलयं प्रापुरर्णवे। सम्प्रत्यपि सिन्धौ चेद विघ्नसम्भावना भवेत् पार्श्वनाथाऽजयाख्यस्य स्मरणात् सा विनश्यति ॥९८॥ ततः स द्विपमागत्य श्रेष्ठी सम्प्राप्य तं नृपम्। उक्त्वा सर्वमुदन्तं च नृपाय पिटकं ददौ ॥ ९९ ॥ ततो नृपोऽजयाख्ये हि नगरे सुमनोहरम्। चैत्यं निर्मापयित्वा च महार्हमणिसंयुतम् ॥ १०० ॥ निस्सार्यपिटकान् मूर्तिं चैत्ये संस्थापितं तदा। मूर्तेः स्नात्रः जलेनैव व्याधिमुक्तोऽभवन् नृपः ॥ १०१ ॥ युग्मं अन्वयः पार्श्वनाथो हि इति नाम पुराऽभवत्। अधुनाऽजार नाम्ना च ग्रामवासेन वै पुनः ॥१०२॥ अजाराख्य पार्श्वनाथो विख्यातोऽस्ति महीतले। अस्य विस्तरवृतान्त जिज्ञासा यदि जायते। शत्रुञ्जयमहात्म्येन ज्ञातव्यं विबुधैरिति ॥१०३॥ दीक्षितानन्तरं सुरि विदधे यत्तपोमुदा। वक्ष्यमाणप्रकारेण गणयाम्यधुना हि तत् ॥१०४॥ सूरीन्दुरेकाशनकं न यात्र-ज्जीवं जहौ न्यायमिव क्षितीन्द्रः। पञ्चापि चासौ विकृतीरहासी-द्गुणान् स्मरस्येव पराभ्रभुः ॥१०५॥ द्रव्याणि वल्भा[१]वसरे व्रतीन्द्रः, सदाददे द्वादश नाधिकानि। किं भावनाः पोषयितुं विशिष्य, भवाब्धिपारमतिसम्भयित्रीः॥१०६॥

स्वपापालोचपदे सूरिः त्रिशतीमुपोषणानां व्यतानीत्, सपादां द्विशतीं षष्ठानकरोत्, चतुर्विंशतित्रिक ध्यातुमना अष्टमानां द्वासप्तति निर्मिमीते स्म, पुनराचाम्लसहस्रयुग्मं चक्रे, पुनर्विंशत्याऽऽचाम्लकैर्विंशतिस्थानकान्यातनेतु स्म, पुनर्द्विसहस्रनिर्विकृतीश्चक्रे। पुनः स एकदत्तिः एकस्मिन् वारके पात्रे यत्रानवच्छिन्नं पानीयान्नादिकं पतेत् सा एकदत्तिरुच्यते, यस्मिंश्चैकमेव सिक्थं भुज्यते नान्यत् तदेकसिक्थं, तत्प्रमुखानि तीव्राणि तपांसि चक्रे। पुनः सहस्रत्रयोत्तर-

१—भाजनावसरे।

षट्शतानि उपवासान् चकार । पुनः प्रथममुपवासस्तत एकभुक्तं तत आचाम्लं पुनरुपोषणं, एवं त्रयोदश मासान् यावद् विजयदानगुरोस्तपो विदधे ।

द्वाविंशन्मासपर्यन्तं वहन् योगमनुत्तरम् । तीव्रं तपश्च विदधे मुमुक्षु र्यतिराट् ततः ॥ १०७ ॥ सुरिमन्त्रं समाराध्य यावन् मासत्रयं पुनः । चतुष्कोटि प्रमाणं हि स्वाध्यायं व्यदधात् गुरुः ॥ १०८ ॥ जिनमूर्तिप्रतिष्ठां च पचाशद् कृतं तथा । इति नाना विधान् धर्मकार्यं कृत्वा यतीश्वरः ॥१०९॥ द्विपञ्चाशत् समधिके षोडशे शतके किल । भाद्रशुक्ल एकादश्यां महामन्त्रं स्मरन् शुभम् ॥ ११० ॥ ऊनायां नगरे रम्ये नाकं प्राप यतीश्वरः ॥

॥ इति श्री जगद्गुरु भट्टारक हीरविजय सूरीश्वर संक्षिप्त जीवनचरितस्य पूर्वार्धः ॥

## प्रान्तियशासकस्योपरि प्रभावः कलाखानः

अभ्रामरसैके च १६३० शतके श्री जगद्गुरुः । यदाऽगच्छत् पाटणहि नगरं सुमनोहरम् ॥ १ ॥ तदा विजयसेनस्य सूरेः पाटमहात्सवं । अत्रत्य हेमराजाख्यो जैनामात्यश्च श्रावकः ॥ २ ॥ बहुद्रव्यव्ययं कृत्वा शुभकार्यमचीकरत् । तदा पाटणपुर्यां च शासकाऽसीत् कलाखानः ॥३॥ अत्याचारेणास्य सर्वास्त्रस्ता अभुवद् बहु । सूरेः पाण्डित्यमाकर्ण्य तेन संमिलितुं पुनः ॥ ४ ॥ प्रतिहारं प्रेषयित्वा आह्वयन् मुनिपुंगवम् । कलाखानो हि प्रथमं सुरिं संस्कृत्य सुनृता ॥ ५ ॥ ततः पप्रच्छ सुरिं यत् गुरो सुर्यशशाङ्कयोः । वर्तते चोपरिस्तात्कः तन्ममाचक्ष्व सस्फुटम् ॥ ६ ॥ उच्चैः शीतरुचिश्चास्ति नीचैरस्तिदिवाकरः । इति सुरेर्वचः श्रुत्वा शासकः पुनरब्रवीत् ॥ ७ ॥ मम शास्त्रे भास्करं च उपरिस्थं हि वर्णितम् ।

गुरुस्तदाकर्ण्य भूयः कलाखानमुवाच च ॥८॥ सर्वज्ञो नास्मि मच्छास्त्रे यथोक्तं तत् समीरितम् । यथाऽऽख्यातं भवच्छास्त्रे तथवाऽङ्गीकुरुष्व त्वम् ।।९।। सुरेर्वचनमाकर्ण्य किंचित् कालं विचिन्त्य च । कलाखानोऽब्रवीत् भूयः यथार्थो हि भवद् वचः ॥१०॥ संभाषणाद् दर्शनाच्चसन्तुष्टोऽस्मि जगद्गुरो । सेवां मदनुरूपां हि कथयस्व महामते! ॥११॥ आजीवनं संयतानां जनानां पापकरिणां । उन्मोचनार्थं सूरिहिं कलाखानं न्यवेदयत् ॥१२॥ गुरोरनुनया सोऽपि मोचितस्तान् च संयतान् । आमासंजीवहिंसायाः निषेधश्च कृतः खलु ॥ १३ ॥

## खानखाना

सम्राट् समागमान्मुक्त्वा यदा सूरीश्वरः किल । प्रास्थाच्चगुर्जर देशं मेडता नगरे स्थितः ॥१४॥ इदानिं खानखाना च आसीत् तत्रैव पत्तने । यश्चसूरीश्वरगुणैः आसीत् परिचितः पुरा ॥१५॥ सूरेरागमनं ज्ञात्वा तमाहूय च सत्कृतम् । तत ईश स्वरूपं हि बोद्धुम् प्रश्नमिदं व्यधात् ॥१६॥ अरूपी रूपवान् वासि ईश्वरो हि जगद्गुरो ! । यद्यरूपी भवेदीशः तदा मूर्तेश्च पूजनम् ॥१७॥ कथं तद् घटते धीमान् निबोधय यथाविधि । इश्वरस्मरणे मूर्तिः प्रधानं चास्ति कारणम् ॥१८॥ शासकस्य वचः श्रुत्वा सूरिः प्राह सयुक्तिकम् । यथा चित्रं चित्रमतां स्मरणं कारयेन्ननु ॥१९॥ तथा मूर्तिमूर्तिमतां स्मरणे कारणम् खलु । सच्छास्त्रं वाचयित्वा च कथयन्ति जना इदम् ॥ २० ॥ इश्वरोक्तमिदम् वाक्यं विषयेऽस्मिन् विचारय । यान्यासीदीशवाक्यानि अग्रे लीनानि तत्क्षणम् ॥२१॥ स्वीकर्त्तव्योऽत इशस्य वाक्यमूर्तिरियं खलु । श्रुत्वेदं खानखानाऽऽह-

मूर्तिरस्तु यथोदितम् ॥२२॥ मूर्तेः पूजनतः सूरे ! किं फलं तच्च ब्रूहि मे । गुरुस्तदा पुनः प्राह खानखानां प्रति द्रुतम् ॥२३॥ जनाः मूर्तेः पूजनेन दर्शनेन तथा खलु । पूतयन्ति स्वमात्मानं स्मरन्ति च विभोर्गुणान् ॥२४॥ स्मृत्वा तदनुसरन्ति धर्मः एव परः स्मृतः । यथा नराणां संसर्गः प्रवृत्तिस्तद् हृदस्तथा ॥२५॥ गणिकासमीपेयानाद् मनो हि मलिनं भवेत् । मनोमलिनतामेव पापमुक्त मनिषिभिः ॥२६॥ एवं मूर्तेः पूजनेन तथा सन्दर्शनेन च। अन्तः पवित्रतामेति धर्मरूपमियं ननु ॥२७॥ महत्वं मूर्तिपूजायाः एवं सूरिरजिज्ञपत् । खानखाना तदाकर्ण्य प्रसन्नः सन्नुवाच तम् ॥२८॥ यत्प्रशंसत्यकबर यथार्थं तन्नसंशयः । खानखाना ततः किंचित् ग्रहीतुमाग्रहः कृतः ॥२९॥ स्वाचारं ज्ञापयित्वा च सूरिः किंचिन्नस्वीकृतः । खानखानोपरीत्थं हि स्वप्रभावं व्यतानयत् ॥३०॥

## महाराव सुरतान

विहरन् यदाऽगमत् सूरिः सिरोही नगरे किल । तदा तत्र महाराव आसीत् सुरतान भूपतिः ॥३१॥ प्रतिबोध्य स्वोपदेशान्नृपं सूरिरनेकधा । अत्याचाराः प्रजानां चाऽरोधयन्नीतिसूरिणा ॥३२॥ अनुष्ठितं महत्कार्यं यदन्यत्तन्निबोधये । सुरतानो महारावः निमित्तेन च केनचित् ॥३३॥ कारागारे निक्षेप निर्दोषान् शतश्रावकान् । श्री संघहृदये तस्मात् महादुःखमजायत ॥३४॥ सूरीश्वरोऽपि श्रुत्वेदं चिन्तां प्राप परां खलु । तेषामुन्मोचनार्थं चाचिन्तयत् युक्तिमन्वहम् ॥३५॥ एकदा सूरि–यतयः विडुत्सृज्याऽगताः पुनः । अकृत्वेरियावहियां संलग्नाः स्वस्वकर्मणि ॥३६॥ ज्ञात्वा सुरिरिदं वृत्तं

सर्वान् साधुन समादिशत् । आयंबिलं विधातव्यः श्वः सर्वे यतिनः खलु ॥३७॥ प्रायश्चित्तमिदं सर्वे स्वीचक्रुः साधवो मुदा । परे च दिवसे सर्वे साधवः सुरिराडपि ॥३८॥ आयंबिलं तपश्चक्रेः स्वपापक्षयहेतवे । आयंबिलतपस्यायामासीत् श्रद्धा गुरोः सदा ॥३९॥ महत् कार्यचिकीर्षायां सुरेरेष विनिश्चयः । आयंबिलं विधायैव कार्यं प्रारभते हि तत् ॥४०॥ अत आयंबिलं कृत्वा गत्वा सुरतान संनिधिम् । कारागारे संयतानां श्रावकानां विमुक्तये ॥४१॥ उपदेशं ददौ सुरिः सुरतानं नराधिपम् । उपदेशप्रभावेण महारावश्च सत्वरम् ॥४२॥ प्रभावितो हि तान् सर्वान् मोचयामास श्रावकान् ॥

## सुलतान हविबलः

विहारमेकदा कृत्वा सूरिः खंभातमागतः । हवीबलाख्यो यवनः आसीदत्र तदा मदी ॥४३॥ सूरिद्विट् महीनामाऽत्रखलोऽप्यासीत् च पत्तने । तस्य प्रेरणया म्लेच्छो ग्रामान्निष्कासयद् गुरुम् ॥ ४४ ॥ अनेन जैनजातौच हाहाकारमभूद् बहु । ये ह्यासन् साधवस्तत्र सर्वगच्छानुयायिनः ॥४५॥ गुरुणा सह ते चापि पत्तनाद् बहिरागताः । अपमाने प्रतिकारं कर्तुं धनविजयो मुनिः ॥ ४६ ॥ विहारं सततं कृत्वा सम्राजमगमद् द्रुतम् । तदोपाध्यायपदभाक् शान्तिचन्द्रो यतीश्वरः ॥ ४७ ॥ आसीदकबरासन्ने सर्वशास्त्रविदग्रणिः । ततः स निखिलं वृत्तं श्रावयामास तं यतिम् ॥४८॥ समस्तं वृत्तमाकर्ण्य शान्तिचन्द्रो मुनीश्वरः । गत्वा चाकबरासन्नं न्यवेदयत तं नृपम् ॥ ४९ ॥ सम्राड् निशम्य तं वृत्तं कुपितः सन्नुवाच च । सूरीश्वरः तिरस्कर्त्ता बधार्ह इति मे मतिः ॥ ५० ॥ मन्निदेशादतस्तस्य बध भवतु सत्वरम् । आज्ञापत्रं गृहीत्वैतद् यतिर्धन-

विजयो द्रुतम् ॥ ५१ ॥ गुर्जरे सूरिनिकटमागमद् बहुहर्षितः । श्रुतवृत्ताः श्रावकाश्चाभुवन् हर्षसमाप्लुताः ॥ ५२ ॥ यदाऽज्ञासीदिमं वृत्तं सुलतानो हविबलः पश्चातापेन हृदयमताप्सीत्तस्य दुर्मतेः ॥ ५३ ॥ किंकरोमि क्व गच्छामि त्राणं मम कथं भवेत् ॥ सम्राडकबरोप्येवं संमानयति यं यतिम् । मयाऽपमानितः सूरिः स जगज्जनपूजितः ॥ ५४ ॥ एवं बहुविधां चिन्तां कृत्वा सुलतानशासकः । सूरिं चानयितुं भूयः खंभातनगरे खलु ॥ ५५ ॥ हस्त्यश्वसैन्यसंयुक्तः स्वयमेव हवीवलः । गत्वा गुरोश्च पुरतः स्वागतीकृत्य सादरम् ॥५६॥ जगद्गुरोश्च चरणे पपात विनयान्वितः । तत आनीय नगरं साञ्जलिः स हवीवलः ॥ ५७ ॥ जगद्गुरुमुवाचेदं वचनं विनयान्वितम् । गुरोममापराधोऽत क्षमस्व करुणाकर! ॥ ५८ ॥ नाग्रे तिरस्करिष्यामि कंश्चिचापि महात्मनः । प्रतिज्ञास्याम्यहं चाद्य ईशनाम पुरस्सरम् ॥ ५९ ॥ एवं विनयसंयुक्तां प्रार्थनां तस्य भूभृतः । श्रुत्वा सूरिगतामर्षः सुलतानमुवाच च ॥६०॥ नास्ति दुर्भावना काचिन्न मम स्वान्ते हवीबलः । मानापमानयोस्तुल्या साधूनां चित्तवृत्तयः ॥६१॥ गुरोर्वचनमाकर्ण्य प्रसन्नोऽभूद् हवीबलः । ततः स सूरे र्व्याख्यानं श्रोतुम् नित्यमुपाश्रये ।६२॥ आजगामैकदा सूरेराननेे मुखवस्त्रिकाम् । संवेष्ट्य वाचयन् शास्त्रं दृष्ट्वा सुलतान शासकः ॥६३॥ वस्त्रं मुखोपरि कथं बध्नासीति प्रपच्छ सः पुस्तकोपरि निष्ठीव पतनादशुचि भवेत् ॥ ६४ ॥ अतो बध्नाम्यहं वस्त्रमितिसूरिर्जगाद च । श्रुत्वोत्तरं समुचितं मुदितोऽभूद् हवीवलः ॥ ६५ ॥ ततो जगद्गुरुं सुरिं प्रार्थयामास साञ्जलिम् । यत् किञ्चिच्चास्ति मद्योग्यं कार्यमाज्ञापयस्व तत् ॥ ६६ ॥ कारागृहे संयतानां जनानां मोचनाय च । अनुशिष्टं सुरीशेन सुलतानो हवीवलः ॥ ६७ ॥ तन्निदेशानुसारेण मोचयामास संयतान् । जीवहिंसानिषेधोऽपि कृतस्तेन च पत्तने ॥ ६८ ॥

# आजमखानः

अष्टाचत्वारिंशदधिके षोडशे शतके खलु । अहमदावादनाम्नीं पुरीमायात् सुरीश्वरः ॥६९॥ तदा चाजमखानाख्यः एतत्प्रान्तियशासकः । जगद्गुरौ च श्रद्धालुरासीदत्रैव पत्तने ॥ ७० ॥ गन्तुं सौराष्ट्रसंग्रामे आसीत् संन्नद्ध एकदा । तदैव धनविजयस्तं मिलित्वाऽब्रवीदिदम् ॥ ७१ ॥ गिरनारादि तीर्थानि सम्राजाचार्पितः किल । आज्ञापत्रं चास्ति तस्य जानात्येव भवानपि ॥ ७२ ॥ अतो हि निखिलांस्तीर्थान् प्रदापयितुमर्हसि । इति सन्दिश्य गुरुणा प्रेषितोऽहं तवान्तिके ॥ ७३ ॥ श्रुत्वा यतेर्वचः खानः उत्तरं प्रददाविदम् । कथयित्वा मत्प्रणामं गुरुं पश्चान्निवेदय ॥७४॥ यास्यामि साम्प्रतं युद्धे प्रत्यागत्य ततः पुनः । भवतः सर्वकार्याणि करिष्यामि न संशयः ॥ ७५ ॥ ततश्च धनविजयः सूरीश्वरमुपागमत् । प्रतिष्ठतिस्म सौराष्ट्रमाजमखानः ससैनिकः ॥७६॥ जामनगरप्रभुं तत्र शत्रुशल्यं विजित्य च । पश्चाज्जूनागढं जेतुं अभीयाय स शासकः ॥ ७७ ॥ विजयं प्राप्य तत्रापि आजमखानो महाबली अहमदावादपुरीं परावृत्याऽगमत् पुनः ॥ ७८ ॥ तत्रागत्यैव प्रथममाह्वयच्च जगद्गुरुम् । धनसोमाख्यशिष्याभ्यां सह सूरीश्वरः कील ॥ ७९ ॥ आजमखानस्य प्रासादं अगमत् सुमनोहरम् । तत्रागतं गुरुं दृष्ट्वा सत्कृत्य विधिपूर्वकम् ॥ ८० ॥ आजमखानोऽब्रवीद् वाक्यं सूरिं विनयसंयुतं चिरात् समुत्सुक आसम् भवद्दर्शनलब्धये ॥ ८१ ॥ अद्याऽभिलाषा सफला सफलं मम जन्म च । यत् साप्रतं भवन्तं हि पश्यामि चिरकाङ्क्षितम् ॥८२॥ विवेकयुक्तं वचनमेवमुक्त्वा स शासकः । प्रपच्छ यन्महाराजा । भवद्धर्मप्रवर्तकः ॥ ८३ ॥ कोऽस्ति ? तस्यावता-

रस्य कियत्कालमभूत्तथा । तद्वाक्यमाकर्ण्यं गुरुरुत्तरं प्रददाविदम् ॥ ८४ ॥ प्राक्सहस्रद्वयादब्दादस्यामुर्व्यामवातरत् । स चतुर्विंशतितमो महावीराख्य तीर्थकृत् ॥८५॥ एतत्प्रदर्शितं वर्त्ममनुसराम्यहं किल । अतो वयं महावीर–साधुनाम्ना हि कथ्यते ॥ ८६ ॥ अहिंसा सत्यमस्तेय ब्रह्मचर्यापरिग्रहाः । एतानि पञ्चव्रतानि पालयामः सदा वयम् ॥ ८७ ॥ द्रव्यक्षेत्र-कालभावान् संविचार्यं पदे पदे । महावीरोक्तपन्थानमनुसराम्यहं सदा ॥८८॥ अस्माद् भगवतः पूर्वं त्रयोविंशतिसंख्यकाः । ऋषभप्रमुखा तीर्थंकरा भूम्यामवातरन् ॥८९॥ तेषां तीर्थंकराणां च सञ्जातेषु सि(क्षि)तौकिल । असंख्येयानि वर्षाणि व्यतीतानि सुशासक ! ॥९०॥ खानस्तत् वाक्यमाकर्ण्यं मुदितस्सन्नुवाच च । दीक्षां गृह्णन् कियद् वर्षमभूत्तव जगद्गुरो ॥९१॥ अभूदब्दंद्विपश्चाशद् दीक्षीते मयि शासक ! । कदाप्यस्मिन्नतरे किमीश्वरस्य च दर्शनम् ॥ ९२ । चमत्कारोऽथवा कश्चिल्लब्धोऽत्र भवता नवा । खानश्रेष्ठ ! जगन्मध्ये नैवागच्छति चेश्वरः ॥ ९९ ॥ ततः कथं दर्शनं स्यादिति सम्यग विचारय । पितृमातृस्वसृपुत्रदारास्वजनबान्धवान् ॥ ९४ ॥ कुटुम्बान्निखिलांस्त्यक्त्वा साध्वभूवं ततः पुनः । चमत्कुर्यामहं लोकान् किमर्थं पावनाऽधिप ॥९५॥ न काङ्क्षे राज्यमतुलं नैव भोगाः सुखानि च । ततः कथं चमत्कारः कर्तव्योऽस्मादृशैः जनैः ॥ ९६ ॥ तथाप्यद्यापि संसारे विद्या चमत्कारिकाकिल । विद्यते किन्तु ज्ञातारः तस्याः प्रायो न सन्ति हि ॥९७॥ क्कास्ति च कालिकाचार्य इष्टका हेम चाकरोत् । यन्निष्ठीवनेव व्याधिं देहिनां व्युमुचत्तनुम् ॥ ९८ ॥ वैद्यः सनत्कुमारः स इदानीं कुत्र विद्यते । एतादृशाः बहुविधाः विद्यावन्तश्च साधवः ॥ ९९ ॥ आसन् पुराऽत्र संसारे स्वचमत्कारकारकाः । परन्तु ते विचार्यैवं नाऽध्यापयन्त सन्ततिम् ॥ १०० ॥ पठित्वा गर्वयुक्तो हि स्वसाधुत्वं च त्यक्ष्यति । अद्यापि वेद्यति

कोऽपि सत्यसन्धश्च सर्वदा। साधुधर्मं चरित्रं च दृढः सन् पालयेत्तदा ॥१०१॥ इच्छानुसारिकार्यस्य भवेत् सिद्धिर्न संशयः। यतो निर्मलचारित्र्यवतां किञ्चिन्न दुर्लभः ॥१०२॥ इश भक्तिं साधु धर्मः पालयामश्च यद् वयम्। एतदीश्वरसान्निध्यकरणाय शनैः शनैः ॥ १०३ ॥ युक्तिमद् वचनं सूरेः श्रुत्वा यवनशासकः। सहास्यां श्रावयामास कथामेवं जगद् गुरुम् ॥१०४॥ एकदाऽऽर्ययवनयोरन्योन्यं कलहोऽभवत्। ईशान्तिकं वयं गन्तुमर्हाम इति हिन्दवः ॥१०५॥ यवनाश्च तथैवोचुः एवं वादो ह्यजायत। परिणामे निश्चयोऽभूत् उभयोः पक्षयोः किल। एकैको हि नरो यातु समीपमीश्वरस्य च ॥ १०६ ॥ तयोर्यदीयः पुरुषः ईशं गत्वा तदाङ्कितम्। चिह्नं नीत्वाऽऽगमिष्यति स पक्षस्तथ्यभाग् भवेत् ॥१०७॥ तत आर्येषु विद्वान् हि एको गन्तुं समुद्यतः निजदेहं परित्यज्य प्रतस्थावीश सन्निधिं ॥ १०८ ॥ अग्रे गच्छन् महद् घोरमरण्यं समुपस्थितम् । तदुल्लङ्घ्यं पुरो गन्तुं न शशाक स मानुषः ॥ १०९ ॥ अतः परावृत्य तत-रागमद् हिन्दु पुरुषः। लोकाश्च कथयामास मिलित्वेश्वरमागतः ॥ ११० ॥ परन्तु चिन्ह नार्पितवान् अतो नाविश्वसञ्जनः। ततः। किलैको यवनो देहं त्यक्त्वेश्वरं गतः ॥ १११ ॥ पुरो गच्छन् दाडमाऽऽम्रजम्बुद्राक्षादिपादपान्। सुवर्णनिर्मितं हर्म्यं महार्हमणिसंयुतम् ॥ ११२ ॥ हेमसिंहासनं चापि सोऽपश्यत् सुमनोहरम्। तत्र सिंहासने रम्ये उपविष्टं जगत्पतिम् ॥११३॥ फिरस्तानामकैः सैन्यैर्विविधैः परिवेष्टितम्। एवं भूतं चेश्वरं स दृष्ट्वा शीघ्रं प्रणम्य च ॥११४॥ लोकप्रत्ययदाढ्यार्थं नीत्वैकं मरीचं पुनः। परावृत्य ततस्तूर्णमाजगाम स्वधाम सः ॥११५॥ सिद्ध्यत्यनेन वृत्तेन यच्च यवनमन्तरा। नहि कोऽपीश्वरासन्नं गन्तुं शक्नोति निश्चितम् ॥११६॥ खानस्येमां वचः श्रुत्वा सूरिरन्येऽपि साधवः। कुर्युः प्रहासमखिलम् चागतं मुनिमण्डलम् ॥११७॥ हसन्तस्तान् समालोक्य खानो-

ऽप्राक्षीज्जगद्गुरुम् । कथं हास्यं प्रकुरुवे कारणं वद सद्गुरो ॥११८॥ कथा यदुक्ता भवता अस्ति सा हास्यकारिका। विवेकी कोऽपि नेमां हि कथां सत्यं वदेत् किल ॥ ११९॥ इमं देहं समुत्सृज्य गन्तुमीश्वरसन्निधिम् । इत्यादि यास्त्वयोक्ता हि कथाः सा च खपुष्पवद् ॥ १२० ॥ एवं हि त्रिविधैस्तर्कैः। सहितं चोतरं गुरुम् । श्रुत्वा खानः प्रमुदितः प्रशशंस गुरुम् बहु ॥ १२१ ॥ ततः सोऽप्रार्थयत् सुरिं विनयं ख्यापयन्निदम् । आज्ञापयस्व मद्योग्यं कार्यं सुरीश यद् भवेत् ॥ १२२॥ उन्मोचनाथ जगडू–साहाख्यश्रावकस्य च । श्रीसूरिः कथयामास आजमखानं हि शासकम् ॥ १२३ ॥ गुरोराज्ञानुसारेण स च कारागृहान्निजात् । श्रावकं मोचयामास लक्षदंडाच्च मोचितः ॥ १२४ ॥ जगडु साहमुक्तेन खानात् सुरेः प्रभावतः । अमदाबादश्रीसंघे महान् हर्षोऽभ्यजायत ॥१२५॥ आनन्दोत्फुल्लनयना श्रावका निखिलाः खलु । चक्रुर्महोत्सवं रम्यं व्ययम् कृत्वा बहून् धनान् ॥ १२६ ॥ एवमाजमखानस्य श्रद्धा भक्तिश्च द्वेऽअपि । गुरौ श्री हीरसुरीन्द्रे वव्रृद्धे चोत्तरोत्तरम् ॥१२७॥ एकपञ्चाशदधिके षोडशे शतके खलु । ऊनाख्यनगरे सुरिश्चातुर्मास्यं यदाऽकरोत् ॥ १२८ ॥ तदाऽप्याजमखानोहि 'मक्का' तीर्थान्निवृत्य च । जगद्गुरोर्दर्शनार्थमागमद् भक्तिप्रेरितः ॥ १२९ ॥ मुद्रा सप्तशतीं तेन उपहारीकृतः कील । नाङ्गीचकार यतिराड् यदा मुद्रां तदा ह्यसौ ॥ १३० ॥ अन्यद्धार्मिक कार्ये मुद्रायाश्च व्ययं व्याधात् । ततः श्रुत्वोपदेशं च मुदितस्सन् गृहं ययौ ॥ १३१ ॥

## कासिमखानः

वैक्रमे षोडशकोन चत्वारिंशत् १६४९ शताब्दके । पाटनाख्यं हि नगरं जगाम श्री जगद्गुरुः ॥१३६॥ तदाऽस्य

नगरस्यासीत् कासिमखानाख्यशासकः । ‘सैयद मुहम्मद’ सुतो यश्चयुद्धे विशारदः ॥१३७॥ कालेऽस्मिन्नेवोभौ साधू तेजसामलसागरौ । केनापि हेतुनाऽभूतां समुदयाद् निराकृतौ ॥१३८॥ रुग्णं कासिमखानं चामिलतां कुपितौ यती । तयोश्चिकित्सया रोगः नष्टोऽभूत् शासकस्य च ॥१३९॥ निरामयः स खानश्च मुदितस्तावुवाच च । मदर्हं युवयोः कार्यमस्ति चेत्तन्निदेशय ॥१४०॥ यद्यावयोः प्रसन्नस्त्वं तदा विज्ञापय श्री गुरुम् । आवयोः समुदाये च प्रवेशयितुमर्हसि ॥१४१॥ कासिमखानः सूरिराजमाह्वयामास सत्वरम् । जगद्गुरुः सुरिरपि आगमत् खानसन्निधिम् ॥१४२॥ दृष्ट्वाऽऽगतं मुनीन्द्रं च तत्प्राभवविमोहितः । यथोचितं स सत्कृत्य प्रेम्णाऽऽलापमकुर्वत ॥१४३॥ आभाषण प्रसंगे च सुरिः प्रोवाच शासकम् । खानश्रेष्ठ ! महाभाग ! जीवहिंसां परित्यज ॥१४४॥ धरायां कः किलैतादृग् जीवं यो नात्ति मानुषः । प्रकृतया सिद्धमेवैतद् जीवोजीवस्य भक्षणम् ॥१४६॥ बहूनामन्न–जीवानामशनादेक स्तुष्यति । भुक्त्वैकं जीवं बहवः पुष्यन्त्यङ्गानि प्राणिनः ॥१४६॥ बहुजीववधादेकजीवहिंसा गरीयसी । अतः किमिति श्रीमद्भिर्जीवहिंसा निषिध्यते ॥१४७॥ शृणु खान ! महाभाग ! इश्वरोक्तं इदं वचः । अनुकम्पाविधानं हि जीवेषु निखिलेषु च ॥१४८॥ द्विविधौ भूतले जीवौ स्थावरोऽन्यत्रसाभिधः । स्वयमेव च ये जीवा गन्तुं नार्हति कुत्रचित् ॥१४९॥ स्थावरास्ते समाख्याता खान तच्छ्रुयतां यथा । पृथिवी सलिलं तेजो वायुश्चाथ वनस्पतिः ॥१५०॥ एतेषां ये च जीवाः स्युः स्थावरास्ते प्रकिर्तिताः । निजप्रभावतो ये न गन्तुमर्हन्ति प्राणिनः ॥१५१॥ त्रसाः किले समाख्यातास्ते जीवा नामतो यथा । तिर्यङ् मनुष्य नारक देवलोकेषु ते स्थिताः ।१५२। स्थावराणां च जीवानां भवत्येकं किलेन्द्रियम् । द्वि-त्रि-चतुःपञ्चेन्द्रियवन्तो भवन्ति च ॥१५३॥ एकेन्द्रियाद्द्वीन्द्रिया हि

द्वीन्द्रियाश्च त्रिकेन्द्रियाः। जीवारनुक्रमं पुण्यवन्तः किल भवन्ति हि ॥१५४॥ पञ्चेन्द्रियाः सन्ति जीवाः पशुमर्त्यादयः खलु। तेष्वपि मनुजाः पुण्यवन्तः पशोरपेक्षया ॥१५५॥ धर्मन्यूनाधिकान् मर्त्या अपि भूपाश्च निर्धनाः। गृहस्थाः साधवः केऽपि सन्त्येतत्सुकृतीफलम् ॥१५६॥ पशोरन्यस्य जीवानां समं विज्ञाय यो नरः। भुनक्ति च पशोर्मांसं नृमांसं नात्ति स कथम्? ॥१५७॥ यतस्तद् बुद्ध्यनुसारेण मनुजान्नपशुस्थिताः। जीवाः समानाः सन्तीति नादृतव्यं च तद् वचः ॥१५८॥ किन्तु सर्वेषु जीवेषु पुण्यस्योपचयापचयम्। अस्त्यतोऽल्पपुण्यवतां वधे पापं च स्वल्पकम् ॥१५९॥ सिद्ध्यत्येवं च सुतरां अल्पपुण्यात्मभि र्यदा। कार्यं सिद्ध्येत्तर्हि वधानर्हातिपुण्यभाक् ॥१६०॥ एवं यदाऽन्नैरस्माकम् कार्यं सिध्यति शोभनम्। तदाऽधिकेन्द्रियाणां हि त्रसानां भक्षणं वृथा ॥१६१॥ अन्यच्चेश्वरनिर्दिष्टा दया मांसभुजां हृदि। न जायते कथमपि जानीहीदं च निश्चितम् ॥१६२॥ एवं हीरोपदेशेन कासिमखानश्च शासकः। ननन्द तस्य हृदये दयाप्याविरभूद् बहु ॥१६३॥ ततः सुरीश्वरः खानं महिषाऽजापतत्रिणाम्। हिंसानिवारणार्थाय संयतानां च बन्दिनाम् ॥१६४॥ उन्मोचनाय च तथाऽजिज्ञपच्चाविलम्बितम्। सुरेरनुज्ञया खानः उक्तं कार्यमनुष्ठितः ॥१६५॥ पश्चात् स खानो गच्छात्तौ बहिर्भूतौ यती पुनः। स्वगच्छे ग्रहणार्थाय प्रार्थयामास तं गुरुम् ॥१६६॥ खानप्रार्थनया सूरिर्दयार्द्रहृदयेन च। प्रावेशयत् पुनर्गच्छे तेज सामलसागरौ ॥१६७॥ एवं सूरीश्वरो हीरः कासिमखानं च शासकम्। उपदिश्य यथायोग्यं जगामोपाश्रयं ततः ॥ १६८॥

## सुलतानो मुरादः

पश्चाशदधिके वर्षे षोडशे शतके यदा। पाटनस्य महासंघैस्संयुतः श्रीजगद्गुरुः ॥ १६९॥ श्रीसित्ताचलयात्रार्थं

गच्छन्ननु क्रमेण च । मार्गेऽमदावादनाम नगरं ह्यागमत्तदा ॥१७०॥ मुरादनामा सुलतानः ससंघं मुनिपुङ्गवम् । सत्कार-मकरोत्बाढं तथाऽर्चीद् बहुद्रव्यकैः ॥ १७१ ॥ ततो गुरूपदेशं सः श्रोतुमीहामदर्शयत् । सूरीश्वरोऽपि विविधानुपदेशान् चकार तम् ॥ १७२ ॥ गुरोर्व्याख्यानमाकर्ण्य तद्दिने स हि शासकः । जीवहिंसानिषेधश्च कृतो निमुलपत्तने ॥ १७३ ॥ एवं कतिपयान् अन्यान् शासकान् श्री जगद्गुरुः । उपदिश्य भृशं जीवदयाकार्यं व्यधादिति ॥१७३॥

## दीक्षादानम्

समप्रवृत्तिः समयो नाभूत् कश्चित् कदापि च । यदा यस्यैव कार्यस्य भवेदावश्यकता बहु ॥१७५॥ तस्मिन्नेव प्रवृत्तिर्हि लोकानां भवति ध्रुवम् । तादृश्येव तदा बुद्धिः प्रकृत्या जायते स्वयम् ॥१७६॥ दर्शनोदयकालो हि यदागच्छति भूतले । निर्माणं मन्दिराणां प्रतिष्ठा त्रिदिवौकसाम् ॥१७७॥ महोत्सवसमारम्भो संघप्रस्थापनं तथा । इत्यादिशुभकार्येषु प्रवृत्ति र्भवति नृणाम् ॥१७८॥ ज्ञानोदस्य काले तु ज्ञानविस्तारकारिका । पाठशाला ग्रन्थशाला विश्वविद्यालयादयः ॥१७९॥ संस्थापयन्ति च जनाः शालाज्ञानप्रचारिकाः । चारित्रस्योदयाः कालो यदागच्छति भूतले ॥१८०॥ साधूनां हि तदा वृद्धिः सर्वत सम्भवन्ति च । वैक्रमषोडशे सप्तदशे च शतके खलु ॥१८१॥ चारित्र्योदय कालोहि आसीदस्मिंश्च भारते ॥

॥ इति श्रीमद् जगद्गुरुहीरविजयसूरीश्वरस्य चरित्रं सम्पूर्णम् ॥